6[1]. C °hatsuḥ | . — 6[2]. BC °vāçishṭāho° saptāgramaveti | ya° C °yaṃ tenopa°. — 7. C °ptāgramaceti° B °mraveti° C °tenopasaṃ° °vato pādau°. — 8. BC °gavāṃ sapta° C °ptāgramaveti° B °mravetiyaṃ°. — 9. BC °gautamakaṃ° C °yaṃ kāpina° B °kapinaptaṃ (ou jyaṃ) cetiyaṃ bhū°. — 10. C bhūyaṃ ceti bha° BC °ṭahradaṃ tīraṃ ceti | ya° C °n tenopasaṃ°.

11. C °ndakā | . — 12[1]. BC āryya kahiṃ bhagavān bhikshū°. — 12[2]. C °hatsuḥ | . — 13. BC °vāçishṭāho° C °gavāt kṛta° C °tīraṃ tenopasaṃ°. — 14. C °yan tenopasaṃkrami° B °saṃkrāmi°. — 15. C °gavato saçrā°.

16. C °pāliye bha°. — 17. C bālikāye °kṛtvā pālikalecchavī niryāntitā | B °bālikaecha°. — 19. C iti mahā° travastu samā° B °travastraṃ samā°. — 20. BC °yaçasya dharma° C °rmarājo nava° B °çāsa dharma°.

भवतु गणवरो चिरस्थितिको
गिरिप्रवरो अचलो यथा सुमेरु ॥

बुद्धानामनुत्पादे प्रत्येकबुद्धा लोके उत्पद्यन्ति । तूष्णीकशोभना महानुभावा एकचरा खड्गविषाणकल्पा एकमात्मानं दमेन्ति परिनिर्वापयन्ति ॥ अपरो दानि प्रत्येकबुद्धो काशिभूमिषु पूर्वाह्णे ग्रामं पिण्डाय प्रविशति प्रासादिकेन अभिक्रान्तप्रतिक्रान्तेन आलोकितविलोकितेन संमिञ्जितप्रसारितेन संघाटीपात्रचीवरधारणेन नागो विय कारितकारणो अन्तर्गतेहि इन्द्रियेहि अबहिर्गतेन मानसेन स्थितेन धर्मताप्राप्तेन युगमात्रं प्रेक्षमाणः ॥ ग्रामिको च ग्रामतो अरण्यं निर्धावति कर्मान्तप्रत्यवेक्षणाये प्रासादिको अभिप्रसन्नदेवमनुष्यो ॥ प्रत्येकबुद्धो तं ग्रामं सावदानं पिण्डाय चरित्वा यथाधौतेन पात्रेण ततः ग्रामातो निर्धावति ॥ प्रायोऽन्नकालो वर्तति न च केनचिद्भिक्षा दिन्ना ॥ ग्रामिको कर्मान्ता प्रत्यवेक्षयित्वा पुनर्ग्रामं प्रविशति पश्यति च तं प्रत्येकबुद्धं ग्रामतो निर्धावन्तं ॥ तस्य भवति ॥ प्रायोऽन्नकालो वर्तति । जानामि तावं किं इमेन प्रव्रजितेन भैक्षं लब्धमिति ॥ ग्रामिकः प्रत्येकबुद्धमुपसंक्रम्य पृच्छति ॥ आर्य लब्धं भैक्षं ति ॥ प्रत्येकबुद्धो तूष्णीकशोभनो तुच्छकं पात्रं ग्रामिकस्य दर्शयति ॥ ग्रामिको प्रत्येकबुद्धस्य तुच्छकं पात्रं दृष्ट्वा समाह ॥ यावदसंविभागशीलो जनो यत्र नाम एवंरूपो दक्षिणीयो एवं महात्मा ग्रामातो यथाधौतेन पात्रेण निर्धावति ॥ इमे किं उद्दीपयं परिभुञ्जन्ति ॥ सो आह ॥ भगवं आगच्छ अहं ते आहारं दास्यामि ॥ सो तं प्रत्येकबुद्धं गृहीत्वा तं ग्रामं प्रविष्टो ॥ सो चतुःमहापथे स्थित्वा अविधाविधाति क्रन्दति ॥ अवस्थितग्रामिकस्य अविधाविधन्ति शब्दं श्रुत्वा सस्त्रीमनुष्यो ग्रामो सन्निपतितः ॥ ग्रामिकस्य

1. C °ṇacaro ci° BC °tiko giriko giripra° C °sumero | . — 3°. C mhaṃ° kalpāḥ eka° B °nti apa°. — 4. B °pūrvāmhne grā° pratiçati prā° C °prativasati | prā° BC °na atikrānta° B °lokikavilokitasamiñjitaprasārita saṃghā° C °samiñjitaprasāditaṃ saṃghā °cīvaram ādāya dhāra° B °ṇena | nāgo° BC °gamātrapre° C °māṇo B °ṇaḥ grā°.

8. C grāmiko ca grāmiko grāmato a° BC °tyavekṣaṇa(C °kṣhe)māṇāye | prāsādikābhiprasannā devamanushyā pratye°. — 9. C °buddhaḥ taṃ grāmaṃ sāvadā °ṇa tato grāmā° B °taḥ grāmāto nirdhyavecati prayā°. — 10. BC prayānno kāla varttati | na kenaci°.

11. C °ddhaṃ grāmāto nivarddhā°. — 12¹. B °vati priyā°. — 12². B priyānno kālo° C priyo no kālo varttiti | . — 13¹. BC °mi bhāvaṃ° C °vaṃ kim imena°. — 13². B °echati āryo la°. — 14¹. B āryo la° C āryye la°. — 14². C °ddho nabhaṇṭhaçobhano tuccha°. — 15. B °buddha tuccha° C °buddho tuccha°.

16. BC °çilo yatra(B °tro) yatra nā° C °evaṃrūpo° B °dakshiyo evaṃ° BC °māto tathā°. — 17¹. C ime kim uddipayaṃ pari° B °kiṃ taddipayaṃ pari°. — 18¹. C °gavan āga°. — 19¹. C °caturmahā ° tvā abhidhāvidhāti B °vidhati avasthi°. — 19². C °ṣya abhidhāri° B °titaḥ grāmi°. — 20. B °cchanti kiṃ°.

उपसंक्रमित्वा पृच्छन्ति ॥ किं येमं किं अविधाविधं ति क्रन्दसि ॥ ग्रामिक आह ॥
क्रन्दामि येमेते न संविभागरता न संविभागशीला: यत्र नाम एवं महात्मातो ग्रा-
मातो एको भिक्षु यथाधौतेन पात्रेण निर्धावति ॥ ते दानि ग्रामे महल्लका तस्य
ग्रामिकस्य श्रुत्वा तं प्रत्येकबुद्धं सत्कर्तव्यं मन्येन्सु ॥ ग्रामिकेन प्रत्येकबुद्धं गृहं प्रवे-
5 शेत्वा आहारेण प्रतिमानेत्वा यावज्जीवमुपनिमन्त्रितो ॥ अहमार्यस्य निमन्त्रेमि
यावज्जीवं सर्वसुखोपधानेन ॥ स्वयंधीता संविदिता ॥ एवन्तुवं आर्य तं दिवस-
माहारेण उपस्थिहिसि ॥ दारिका प्रीता तुष्टा संवृत्ता ॥ शोभनं मे कल्याणं कर्म
सेवितं ॥ सा दानि तं प्रत्येकबुद्धं दिवसमाहारेण उपस्थिहति प्रासादिकाभिप्रसन्न-
देवमनुष्या ॥ प्रत्येकबुद्धो परिज्ञातभोजनो सर्वाशुचिपरिक्षीणो महाभागो ॥ तस्य
10 दानि ग्रामिकस्य धीतुः तां प्रत्येकबुद्धस्य ईर्यां पश्यित्वा उदारं प्रसादं जातं । तथा
अन्ये पि जना प्रसन्ना ॥ सो दानि प्रत्येकबुद्धो तस्य ग्रामिकस्य प्रसादेन तथैव ग्रा-
मर्येवे अनुपादाय परिनिर्वृतो ॥ ततो ग्रामिकेन तं प्रत्येकबुद्धं ध्यायेत्वा स्तूपं कृतं
न चातिक्षुद्रकं न चातिमहन्तं सुधामृत्तिकालेपनं ॥ सा दानि ग्रामिकस्य धीता
तं स्तूपं दैवसिकं कांस्यपात्रेण पूजेति गन्धेन माल्येन च धूपेन च ॥ पश्चात्ततो स्तू-
15 पातो तं नानाप्रकारं माल्यं वातेन अपकर्षीयति ॥ ताये दानि तं माल्यं संकड्ढित्वा
चेटीहि सार्धं दीर्घमालागुडिका चित्रोपचिता नानापुष्पाणां ॥ तत्र ताये मा-
लाये तं प्रत्येकबुद्धस्य स्तूपं सर्वं परिवेठितं ॥ तस्या तां मालां तहिं स्तूपे स्थितां च
माला च सर्वा रूपेण च तेजेन च अभिभवित्वा तिष्ठन्तीं देवेषु दिव्यमायुःप्रमाणं
अपेत्वा शोभन्तीं दृष्ट्वा अतिरिव चित्तप्रसादमुत्पन्नं ॥ सा दानि प्रसन्नचित्ता प्रणि-

1¹. C °kiṁ abhidhāvi°. — 2. B krandrāmi yaṁ cetena saṁ° C °mi yaṁ caitena saṁ° çīlā | ya° B °lāḥ | ya° BC °kahu tathā°. — 3. C °grāma maha° °ritavya manyetauḥ B °nyetau | . — 4. C °praviveçaveçitvā āhā° B °praveçiveçitvā āhā°. — 5. C āham ā° B °rvasukopadhānena sva°.

6¹. BC svajanaṁ dhītā saṁviditā eva°. — 6². C evaṁm tuvaṁ ārya taṁ° hiṁ B °hisa | . — 7¹. B °vṛittā çobha°. — 7². BC °lyāṇa karma°. — 8. BC so dāni° B °prāsadikā° BC °dikāni(C °ri) | prasa° ahyā pra°. — 9¹. BC °rvāçu(C °su)caparikhīṇo°. — 9². C °dhitau taṁ pra° B °tuḥ taṁ pra° BC °sya īryaṁ pa° jātaṁ tathā°. — 10. BC °anyoepi ja° B °sannā oso dā° C °sanno.

11. B eso dāni° C ya so dāni° traivaṁ grā° B °vṛito tato°. — 12. C tataḥ grā° cāpi ahuḍḍā° B °cāpi khuḍḍākaṁ° BC °sudhāsyatikālepanaṁ sā dā°. — 13. BC °sikaṁ so yaṁ pātraṁ(C °tre) pūje° C °pūje pi ga° BC °nālena mālye° pena ca sā paçcā°. — 14. C °karshiya° BC °yantaṁ | . — 15. BC °saṁka(C °gha)ḍḍitvā° C °sārddha dirghamālāṁ guḍi° BC °ḍikāni citropacitrā(C °tro) nānā°.

16. B °veṭitaṁ | C °veshṭitaṁ | . — 17. BC tasya tāṁ mālā tahiṁ° sthitā ca tāsāṁ ca sarvā° jena abhi° shṭhati de° C °pramāṇaṁ ksha° B °ṇaṁ kapetvā°.

ध्यानमुत्पादेति ॥ यादृशेषा माला अत्र स्तूपे शोभति एतादृशा मे माला मूर्ध्नि प्रादुर्भवेया यत्रयत्र उपपद्येयं ॥

सा दानि तं कल्याणं कर्मं कृत्वा ततश्चवित्वा देवेषूपपन्ना रतनमालाये आबद्धा तस्या तहिं उपपन्नाये अप्सरसां शतसहस्रं परिवारेति ॥

ततो पि च्युता वाराणसीयं कृकिस्य राज्ञो अग्रमहिषीये कुक्षिस्मिं उपपन्ना ॥ 5 नवानां वा दशानां वा मासानामत्ययेन देवीये दारिका प्रजाता प्रासादिका दर्शनीया रतनमालाये आबद्धा । तस्या मालिनीति नामं कृतं ॥ राज्ञो कृकिस्य प्रिया मनापा तथा सर्वस्य परिजनस्य सम्मता सर्वस्याधिष्ठानस्य यावत्कृतपुण्या दारिका ॥

प्रत्येकबुद्धो ग्रामं पिण्डाय उपसंक्रमे । 10
यथाधौतेन पात्रेण ततो ग्रामातो निष्क्रमेत् ॥
तमेनं ग्रामिको दृष्ट्वा संबुद्धमिदमब्रवीत् ।
कच्चिद् अरोगो भगवां लभ्यते पिण्डयापनं ॥
ततो स भगवन्पात्रं ग्रामिकस्य प्रदर्शये ।
न चात्र अदर्शी भिक्षां दौर्मनस्यं ग्रामिकस्याभूत् ॥ 15
अन्धभूतो अयं लोको मिथ्यादृष्टिहतो सदा ।
एतादृशं दक्षिणीयं न पूजेन्ति यथारहं ॥
ग्रामान्तं उपसंक्रम्य विहिंसित्वान चतुष्पथे ।
अविधाविधं ति क्रन्दति ततो सन्निपते जनाः ॥
महाजनो समागत्वा इस्त्रियो पुरुषा पि च । 20
ग्रामिकं उपसंक्रम्य किं करोम अविधाविधं ति ॥

1. BC °çeshâṁ mâlâ ° stûpaṁ çobhati | etâdṛçeṣ me mâ° C °durbhâveyâ yatra upapa° B °rbhaveyo yatra°. — 3. BC °lyâṇakarmaṁ(C °rma) kṛ° B °punnâ | rata° C °pannâḥ ratanamâ° BC °baddhâye | tasya tahiṁ °nnâya apsa° °rivâretvâ tato°. — 5. B °gramahishi° C °gramahipiye ku° pannah.

6. C °sânâm atyena de° jâtâḥ prâ° B °baddhâ tasya°. — 7[1]. BC tasya mâ°. — 7[2]. BC °priyo manâ° C °nâpo tathâ° B °shṭhânasya | yâva° BC °puṇyo dâri°. — 10. BC pratye°. —

11. BC °treṇa grâmâto niṣ(C °nî)kramet ‖. — 12. BC °mikaṁ dṛishṭvâ°. — 13. B kañci a° C kañcid arogâ bhagavân labhyate piṇḍâyapanaṁ | B °piṇḍâyâyanaṁ. — 15. BC °câtra darçi bhikshâ dau° C °daumanasyâ grâmi° B °nasya grâmikasya abhût C °mikasu abhût ‖.

16. C °loke mithyâ°. — 17. C °çaṁ darçaniyaṁ na pûjanti yathâ ahaṁ | B °yathâ °rhaṁ ‖. — 18. BC °sthitatvâna°. — 19. C abhidhâvi° B °vidheti kra° BC °ndante tato, (C °taḥ) sanni°. — 20. BC °rusho pi ca ‖.

21. C °ma abhidhâ° BC °vidhe ti ‖.

ग्रामिको आह ॥

यं नूनं कोटि युष्माकं न संविभागरतो जनो ।
एषो हि एतस्मिं ग्रामस्मिं एको भिक्षु विहर्यति ॥
ग्रामिकस्य वचनं श्रुत्वा सर्वो ग्रामो सहस्त्रियो ।
आरायणीयं करेन्सु संबुद्धस्य पुनःपुनः ॥
तमेवं ग्रामिको वच सभार्याको सपुत्रको ।
सर्वसुखविहारेण निमन्त्रेमि तथागतं ॥
ग्रामिकस्य स्नुषा धीता शुचिवस्त्रा सुवासना ।
आचारगुणसम्पन्ना उपस्थाय तथागतं ॥
ग्रामिकस्य प्रसादेन तस्मिं ग्रामस्मिं सुव्रतो ।
संबुद्धो परिनिर्वायि ऋषि क्षीणपुनर्भवः ॥
तं निर्वृतं ध्यायेत्वान स्तूपं कारेसि ग्रामिको ।
नृत्यवादितगीतेन पूजां कारेसि महर्षिणो ॥
समासाद्य सितं पुष्पं वातेन अपकर्षितं ।
एकाध्यं संहरित्वान दीर्घमालां वगूहयेत् ॥
सा यादृशी तथैव मह्यं माला चित्रा उपनिश्रिता ।
एतादृशी मे शिरसि भोतु माला यथा अयं ॥
यत्रयत्रोपपद्येहं तत्रमेतं समृध्यतु ॥
सा तं कर्म करित्वान कल्याणं बुद्धवर्णितं ।
त्रायस्त्रिंशेषु देवेषु उपपद्यथ अप्सरा ॥
अप्सराशतसहस्रं च पुरस्कृत्वान तां स्थिता ।
तासां सा प्रवरा श्रेष्ठा नारी सर्वाङ्गशोभना ॥

2. C °shmâkaṁ saṁvi° B °shmâka na saṁ° C °bhâgaṁrato janâ | . — 3. BC esho hi eta°. — 4. C °sarve grâmo saindriyo | . — 5. BC ârâya(C °pa)ṇîyaṁ na karetsu(C °tsuḥ) saṁ° C °punarpunaḥ | .
6. BC °grâmika avaca ° bhâryâko°. — 7. BC sarvesu ° mantresi tathâ°. — 8. BC °strâ subasanâ | . — 9. BC âcare guṇa° C °sthâyaṁ ta°. — 10. C °masmiṁ sarva° BC °vratâ | .
11. C °rvâya ṛshi° B °rvâya ṛshi kshipu°. — 12. C °nirvṛiti dhyâya° BC °yetvâ stû°. — 13. C °tena pujâṁ kâ°. — 14. C °shpaṁ citena asukapitaṁ B °tena avakarshi°. — 15. BC ekadhyaṁ(C °dhya) saṁ° B °dirghimâlâṁ° C °mâlâ vagû° B °vaguhayet | .
16. BC so tato(C °to) taṁ vayaṁ mâlâ ° upaçritâ | . — 17. C °bhontu mâ° B °mâlo yathâ°. — 18. BC ya(C °ta)tra tatropa°. — 19. C so taṁ ka°. — 20. BC yas triṁ(B °taṁ)çe° B °çeshesu de° BC °papadyishu apsa° C °psaraḥ | .
21. B °sthitvâ | . — 22. B °çreshṭo nâ° C °çreshṭâ(?) nâri sarvâṁ ca çobha° B °sarvâṅgaçobha°.

तती तासां चवित्वान देवकन्या महर्द्धिका ।
राज्ञो कृकिस्य भार्याय कुक्षिस्मिं उपपद्यिथ ॥
निर्वृते द्वादशमासे राजभार्या प्रजायत ।
मालिनी नाम नामेन नारी सर्वाङ्गशोभना ॥
. . . . अतिवर्णा अतिरूपवती अभूत् । 5
श्रेष्ठा च राजकन्यानां धीता सा काशिराजिनो ॥
आचारगुणसम्पन्ना शुचिवस्त्रा सुवासना ।
राज्ञो कृकिस्य अन्तिके तिष्ठते प्रांजलीकृता ॥
तमेनमवचद्राजा तिष्ठन्तीं प्रांजलीकृतां ।
ब्राह्मणां मे तुवं भद्रे भोजापेहि अतन्द्रिता ॥ 10
पितुः सा वचनं श्रुत्वा ब्राह्मणानामनूनकां ।
विंशत्सहस्रां भोजेति सर्वकामेहि मालिनी ॥
तमेनं ब्राह्मणा दृष्ट्वा मालिनीमप्सरोपमां ।
रागपर्यवनद्धचित्ताय उल्लपन्ति पुनर्पुनः ॥
उद्धतां उन्नतां दृष्ट्वा चपलां प्राकटेन्द्रियां । 15
मालिनी संविचिन्तेति न इमे दक्षिणारहा ॥
सा आरुहित्वा प्रासादं समन्तेन विलोकये ।
अदर्शी भगवतो सिद्धं संबुद्धस्य श्रिरीमतो ॥
सा प्रासादवरगता काशिकवरचन्दनेन आलिप्ता ।
राज्ञो कृकिस्य धीता सर्वा दिशता विलोकेति ॥ 20
सा अद्दशासि . . . . . प्रासादिकेनेंगितेन प्रविशन्तं ।
बुद्धस्य श्रावकान्वाहितपापां अन्तिमशरीरां ॥

1. B tato sâ cyavitvâ devakaññyâ° C °ddhikâḥ | . — 3. C °dvâdaçe mâse° prajâyamtâ | . — 4. BC °nârî sarvâ° bhanâ | . — 5. BC °bhût çre°.

6. BC çreshṭâ râjakaññyânâṁ | çitâ° râjâno kâç°. — 7. BC °panno çu(C °su)civa° C °strâ savasanâ | . — 8. B °kisya dutâni tishṭha° C °kisya etâni tishṭhante prâñjalikṛitâ | B °jalîñikṛitâ | . — 9. BC tamenaṁ a° tishṭhatâṁ prâ° C °jalikṛitâṁ (ou tâ?). — 10. BC °bhojâyehi a° C °atendriyaḥ | .

11. C °hmaṇânâm anûnakaṁ | . — 12. C °srâṁ bhuñjanti sa° B °bhojenti sa° C °mâlini | . — 13. C °hmaṇaṁ dṛishṭvâ mâ°. — 14. BC râgogra°. — 15. BC uddhatâṁ(C °tân) unna° C °caparâṁ prakṛitendri° B °prakaṭe°.

16. B °cinteti na i° BC °kshiṇâ °rahâ | . — 19. BC °rugato kâçi° C °[illegible]° BC °ndane alipta râjño°. — 20. B °kṛikikasya dhî° C °dhîtaḥ sarvân diçe vikalokayati | .

21. B °dikena ijitena° C °kenakenejitena praviçantaṁ | B °çantaṁ | . — 22. BC °sya saçrâva° B °kân | vaditapâyâṁ anti° C °kân vaṁditapâdâṁ anti°

सा दासी प्रेषेति एतेषां ऋषीणां वन्दनं ब्रूहि ।
वन्दित्वा च भणाहि प्रविशथ भदन्ता निषीदाथ ॥
सा दासी उपगम्य पादां वन्दित्वा भावितात्मनां ।
प्राञ्जलिकृता अवोच प्रविशथ भदन्ता निषीदाथ ॥
5 रागा उपातिवृत्ता विशारदा अग्रपण्डिता लोके ।
बुद्धस्य श्रावका बाहितपापा अन्तिमशरीराः ॥
तं पाण्डरं च सुकृतं सुतोरणं खड्गअसिगुप्तं ।
प्रविशेन्सुः अन्तःपुरं राज्ञो धीतुर्मनापाये ॥
काशिकप्रत्यास्तरणं सुविचित्रकलापकं मणिविचित्रं ।
10 विचित्रपुष्पावकीर्णं प्रज्ञप्तं आसनं आसि ॥
पद्ममिव शुभाभासं जलेरुहं यथ जले अनुपलिप्तं ।
तथ अनुपलिप्तचित्ता तत्र निषीदे विगतमोहा ॥
शालीनामोदनविधिमकालकमनेकव्यंजनमुपेतं ।
स्वहस्तमुपनामयते यथा भदन्तान अभिरोचे ॥
15 ते भिक्षू अवचेन्सुः शास्ता नो अग्रपण्डितो लोके ।
तस्या प्रथमं भक्तं सो भुंजये च महावीरो ॥
बुद्धो ति श्रुणित्व घोषं लोके कुतूहलं अश्रुतपूर्वं ।
अधिकतरं सा प्रमोदे इमेहि जिन सो विशिष्टतरो ॥
सा मालिनी अवोच भुञ्जित्वा शास्तुनो हरथ भक्तं ।

1. C sā dāsi preshayati e° BC °nāṁ kruhi vandi°. — 2. BC °nditvā bhaṇāhi | pra° dante nishīdatha | . — 3. B sa dāsī° C sā dāsī upa° BC °bhāshitātmanāṁ prāñja°. — 4. C °jaliṁkṛi° B °jalikṛitā | avoca pravi° C °avocam pravi° BC °dante nishīdatha | . — 5. B rāgā upā° C rāgām upā° B °loka bu°.

6. BC °tapādā anti°. — 7. BC °ṇḍalaṁ sukṛitatāraṇaṁ khadgaasiguptaṁ pravi°. — 8. BC °viçetsu(C °tsuḥ) | antaḥpuri rājño dhitu(C °tuḥ) | manāpaye kāçi°. — 9. BC °pratyastaraṇaṁ ° citraṁ kalanda(C °laṁnda)kaṁ ° citrapushpā°. — 10. BC pushpāvakīrṇaṁ prajñaptā āsanā ā° C °nāṁ āsī B °āsi pa°.

11. BC °m iva subhasitaṁ | jare(C °ra)ruhaṁ | ya° B °yathā jale nuliptaṁ tatha° C °yatha kralanuliptaṁ. — 12. C tathā anu° BC °anuliptacitrā ta° nishīdeti gata°. — 13. B sālinā° BC °m odanaṁ viditakāla(C °ra)kaṁ aneka°. — 14. C °panāmitaṁ ya° B °panāmayitaṁ yathā bhedanta ti ca | avoca te te bhi° C °yathā bhedanti ca | avocat te bhi°. — 15. BC °bhikshu avacetsu(C °tsuḥ) çāstā no(C °ne) agra° C °grapaṁṇgaro | loka B °ṇḍito | loke tasya°.

16. BC tasya pra° B °ktaṁ sā tuñjaye mahādhīro | C °jaye maha°. — 17. C buddheti sā çru° B °ddho ti sā çru° BC °ṇitvā gho° B °loka kutūhalam açru° C °tūharaṁ açru° B °pūrvaṁ adhi°. — 18. C °kataleṁ ca pra° B °taraṁ ca pramode | ime ° taro sā°. — 19. BC °linī adho ca bhu ° harah | bhaktaṁ adhi°

अभिवादनं च ब्रुध मम वचनातो लोकनाथस्य ॥
अधिवासे भक्तं भगवां सुवेतना सार्धं भिक्षुसंघेन ।
अन्तःपुरस्य मध्ये राज्ञो धीतुर्मनापाय ॥

ते दानि भगवतो काश्यपस्य अग्रश्रावका तिष्यो च भारद्वाजो मालिनीये भक्तं परिभुंजित्वा भगवतो काश्यपस्य भक्तमादाय ऋषिपतनं निर्धाविता ॥ भगवतो काश्यपस्य पिण्डपात्रमुपनामेत्वा मालिनीये वचनेन भगवन्तं काश्यपं वन्दनं वदेन्सु ॥ कृकिस्य भगवं काशिराज्ञो धीता भगवतो वन्दनं पृच्छति सश्रावकसंघस्य श्वेदानि च भक्तेन निमन्त्रेति सार्धं भिक्षुसंघेन राज्ञो कृकिस्य अन्तःपुरे तस्या भगवां अधिवासेतु अनुकम्पामुपादाय ॥ भगवता काश्यपेन वैनेयवशेन अधिवासितं ॥ ये तेहि महाश्रावकेहि सार्धं पृच्छया गता भगवतो काश्यपस्य ओवादमादाय तेहि गत्वा मालिनीये निवेदितं ॥ अधिवासितं तेन भगवता काश्यपेन श्वेदानि भक्तं सार्धं भिक्षुसंघेन ॥ मालिनीये तेषां पुरुषाणां श्रुत्वा तामेव रात्रिं प्रभूतं खादनीयं भोजनीयं प्रतिजागरित्वा भगवतो काश्यपस्य कालमारोचापितं ॥ भगवां कालज्ञो वेलाज्ञो समयज्ञो पुद्गलज्ञो पुद्गलपरापरज्ञो ॥ कल्यमेव निवासयित्वा पात्रचीवरमादाय येन वारिकाविकालो संप्राप्तो सार्धं मागधे प्रातराशे वर्तमाने सार्धं विंशतीहि भिक्षुसहस्रेहि वाराणसिं नगरं प्रविशेत् ॥ हंसप्रहीनकमिव बुद्धा भगवन्तो नगरं प्रविशन्ति ॥ दक्षिणपार्श्वे तिष्यो महाश्रावको । वामे पार्श्वे भारद्वाजो महाश्रावकः ॥ तेषां पृष्ठतो चत्वारो महाश्रावका चतुर्णां अष्ट अष्टानां षोडश षोडशानां द्वात्रिंश द्वात्रिंशतानां चतुषष्टि ॥ एवं भगवां विंशतिहि भिक्षुसहस्रेहि पुर-

1. BC °ca krutha | mama °sya adhi°. — 2. BC °vāsa bhuvanaṁ bhagavāṁ (C °vāt) suceta°. — 3. B °dhita manā° C °dhituḥ manā°. — 4. C °çyapa agra° BC °çrāvako tishyo° C °ṛishipattanaṁ ni° BC °rddhāvito | . — 6. C °vacana bhagavato kāçya° B °vanta kāçya° B °vadeian | C °vadonsuḥ | .

7. B °eclati | saçrā° çucedāni° treti | sā° C °sārddha bhi° hpuraṁ ta° B °puro ta° BC °tasya bhaga° C °gavān adhivāsato a°. — 9¹. C °vato kāçya° B °sitaṁ ye tehi°. — 9². B ye tehi° C etehi° rusho āgatā° B °rusho gatā° C °paçya ca ovā° B °dāya | tehi°.

11. BC °sitā tena° bhaktena sā° C °sārddha bhi° B °ghena māli°. — 12. C °purushāṁ puru° tāṁ eva° C °daniyabhoja° BC °gavantaṁ kāçya° C °kālaṁ ārovāpitaṁ | B °ropitaṁ | . — 13. C °kālajo ve° BC °velajño° B °samayejño puṁgalojño puṁgala° C °yajño puṁgaraparāpa° B °parajño kalpa°. — 14. BC kalpam eva° dāya | yena° C °yena vātikātivikāle saṁ° B °yena cātikātikātikāle cātivikāle saṁ° BC °prāpte sā yā māga° C °prātase va° B °tarāse va° C °sārddha viṁça°.

16. BC haṁsaprahinakaṇa bo° B °buddho bha° visanti | . — 17². C °vako | . — 18. B °prishṭato° BC °turṇṇā ashṭa° C °çānāṁ dvātriṁçatānāṁ | catushashṭhī B °tānāṁ | catushashṭi evaṁ°. — 19. B °purastato rājño° C °purato rājña° B °praviçata | .

स्थितो राज्ञो कृकिस्य अन्तःपुरं प्रविशति ॥ भगवतो नगरं प्रविशन्तस्य ओनता
भूमिः उन्नमति समं भूमितलं जातं संस्थाति । अशुचिपाषाणशर्करकठल्ला भूमिं प्रवि-
शन्ति मुक्तपुष्पावकीर्णा मही संस्थाति । पुष्पोपगा वृक्षा पुष्पन्ति फलोपगा वृक्षा
फलन्ति । ये तत्र मार्गे वामदक्षिणेन वापीयो वा पुष्करिणीयो वा शीतलस्य वा-
5 रिस्य भरिता भवन्ति उत्पलपद्मकुमुदपुण्डरीकनलिनीसौगन्धिकाप्रच्छन्ना । उद-
पानमुखा तोयं प्रस्यन्दन्ति । अश्वा हेषन्ति वृषभा नर्दन्ति हस्तिकुंजरा नर्दं
मुंचन्ति ॥ समनन्तरं इन्द्रकीलं पादेन ओक्रमति सर्वं च नगरं प्रकम्पति । अन्धा
आलोकेन्ति बधिराः शब्दं शृण्वन्ति उन्मत्तकाः स्मृतिं प्रतिलभन्ते व्याधिता व्याधितो
मुच्यन्ति गुर्विणीयो अरोगाः प्रसूयन्ति नग्नानां चेलाः प्रादुर्भवन्ति बन्धनबद्धानां
10 बन्धनानि स्फुटन्ति पेडाकरण्डावृतानि रत्नानि संघट्टन्ति भाजनानि रणन्ति ।
ये भवन्ति नगरे परिवादिनीयो वल्लकीयो वेणुवीणामृदंगभेरीपणवा असंस्ततान्यपि
अघट्टितानि संप्रवायन्ति । शुकसारिककोकिलहंसमयूराः स्वकस्वकानि रुतानि
मुंचन्ति ॥ चतुरङ्गुलेन च भूमिं असंस्पृशन्तो गच्छति धरणितले च पद्मकानि
प्रादुर्भवन्ति सहस्रारानि सनाभिकानि सर्वाकारपरिपूर्णानि अन्तरीक्षे च देवा
15 दिव्यानि तूर्यसहस्राणि प्रवादयन्ति दिव्यानि पुष्पवर्षाणि प्रवर्षन्ति ॥ भगवां का-
श्यपो सश्रावकसंघो एदृशाये विधीये एदृशाये विभूषाये एदृशेन समुदयेन एदृशाये
ऋद्धीये एदृशेन विभवेन देवमनुष्येहि सत्क्रियन्तो सश्रावकसंघो राज्ञो कृकिस्य
अन्तःपुरं प्रविष्टो ॥ भगवां मालिनीये सश्रावकसंघो तहिं अभ्यन्तरिमे चतुःशाले
महासत्कारेण परिविष्टो प्रभूतेन प्रणीतेन खादनीयेन भोजनीयेन अनुरसेन अप-

1. C °sya onnatâr ahaṁ unna° B °onator ahaṁ unna° C °nnamaṁti sa° B °samâ bhû-mitala jâtâ saṁsphâri | C °tala jâtaṁ saṁsthitâni | . — 2. B °shâṇâsarkara°. — 3. BC °vṛikshâ(C °ksho) pushpaphalopagâ°. — 4. B °pushkiriṇî ° vâṇiya ° vanti | utpa° C °echa-nnâḥ | . — 5. BC °khâto prasya° B °ndanti açvâ°.

6. C açvâ hreshyanti° C °nandanti ha ° râ ca nâdanti muṁ° B °râ ca nâdanânti muṁcanti samu°. — 7¹. C °pâdena câkrima°. — 7². B °badhirâḥ çabdaṁ çriṇvanti unmattakâḥ ° pralabha° C °nte | vyâdhito vyâdhitân muṁcanti | gu ° gnânâṁ civarâ prâdu° B °vanti | ba-ndhanabadhânâṁ ba ° ṭanti | yetrâkara° C °ṭaki | peḍâ° BC °ḍapatâni ra° C °ratnâni saṁ-ghaṭanti bhâ°.

11. BC °rivâdaniyo° B °vallariyo ve° BC °paṇava saṁkha° C °ghaṭitâ°. — 12. C °sva-kâni ratâni° B °ati catu°. — 13. C °ranitale° B °ṇitare ca padadhânâni prâdu° C °pada-pradhânâni prâdu° BC °hasrâṇi sanâvikâ° C °rvâkâlaparipurṇṇâni° B °devâ deva divyâ° BC °pravâdyanti° C °divyâṇi pu° B °rshanti bha°. — 15. C °gavâṁ kâçya° BC °edṛiçe vidhi ° dṛiçeye vi ° çâye riddhi ° sena edṛiçâye vibhûshâye | yena bhagavâṁ(C °vân) kâçyapo devama°.

18. C bhagavân mâli ° saṁghâ taṁhi abhya° B °gho taṁhi abhya° BC °ḥçâle saçrâvaka-saṁgho mahâ ° reṇa pravishṭo ° sena bhaga°.

रसेन अविगतरसेन प्रत्ययरसेन ॥ भगवां भुक्तावी सश्रावकसंघो धौतहस्तो अप-
नीतपात्रो मालिनी धर्म्यया कथया संदर्शयित्वा समादापयित्वा समुत्तेजयित्वा
संप्रहर्षयित्वोत्थायासनातो प्रक्रमे ॥

यानि तानि कृकिस्य काशिराज्ञो विंशति ब्राह्मणसहस्राणि नित्यभोजिका ते
कुपिता यं मालिनीये भगवां काश्यपो सश्रावकसंघो राजकुले परिविष्टो महता 5
सत्कारेण महता सन्मानेन ॥ तेहि सर्वा ब्राह्मणपरिषा संनिपातिता अनेकानि
ब्राह्मणसहस्राणि ॥ तेन कालेन तेन समयेन ब्राह्मणाक्रान्ता पृथिवी भवति ॥
संनिपतिता मालिनीं घातेतुकामा ॥ एषा येव अत्र राजकुले ब्राह्मणानां कण्टको
उत्पन्नो । कृकिस्य राज्ञो ब्राह्मणेषु अभिप्रसन्नो तस्य विंश ब्राह्मणसहस्रा दैवसिकं
भुंजन्ति एषा च पितृणा ब्राह्मणानां नियोजिता एतानि ब्राह्मणानि दैवसिकं भोजे- 10
हीति । एताये ब्राह्मणानां अवमन्यित्वा श्रमणा राजकुले प्रवेशिता एषां च एदृशो
पूजासत्कारो कृतो । सा एषा यत्तं ब्राह्मणानां उपजीव्यं राजकुलातो पूजासत्का-
रार्थं श्रमणानां परिणामेति मानयन्तीति ॥ तेहि ब्राह्मणेहि एषो व्यवसायो कृतो
मालिनी मारेतव्या ॥ कृकी च काशिराजा जनपदं प्रत्यवेक्षको व गतो ॥ तेहि
ब्राह्मणेहि कृकिस्य राज्ञो दूतो प्रेषितो ॥ एदृशं मालिनीये ब्राह्मणानां मूले अव- 15
क्रमागमुत्पन्नं । काश्यपस्य सश्रावकसंघस्य राजकुले प्रवेशित्वा एदृशो च पूजास-
त्कारो कृतो ब्राह्मणानां दर्शनं पि न देति । यथा महाराजेन संदिष्टं तथा न
करोति । यत्तु ब्राह्मणानां राजकुले नित्यकं विंशतीनां ब्राह्मणसहस्राणां तं पि न
वर्तेति । मालिनी ब्राह्मणानां दर्शनं पि न देति ॥ राजा श्रुतमात्रेणैव जनपदातो

1. C bhagavân bhuktâ° B °nîm dhammâ kathayâ° BC °tvâ samadâpa° praharshyo(C °sho)-tthâyâsa°. — 4. C yânimâni kṛiki° viṁçad brâhma° bhojanakâ kupi° gavân kâçya° kule pravishṭo° B °hatâ sammânena tehi°.

6. BC °shâ sânnipâ° C °titâḥ | ane° B °srâṇi tena°. — 7. B °vati saṁnipa°. — 8¹. B °titâ | mâ° C °titâḥ mâ° BC °lînî ghâ°. — 8². B eshâ ye atra° C eshâṁ ye atra° ṇânâṁ ka-raṇḍako u° B °kaṇṭhako utpanno kṛiki°. — 9. C kṛikisya râ° B °tasyâ viṁ° C °viṁçad brâhma° hasrâṇi devasi° B °sâ devasikaṁ bhojanti° C °janti eshâṁ ca upajîvyaṁ râjaku-lâto pûjâsatkârârthâm çravaṇânâṁ pariṇâmitaṁ mânayatîm | tehi brâhmaṇehi esho vyava-sâyo kṛitaḥ mâlinî mâretavyâ | kṛiki ca kâçirâjño eshâṁ ca pitṛiṇâ brâ° B °jitâ | etâ° BC °devasi°

11. C °trâ çravaṇa râ° B °çitâ | esho ca e° BC °dṛiço ca pûjâ° kṛito sâ e°. — 12. BC sâ eshâṁ ya° C °yattakaṁ brâhmaṇânâṁ jîvyaṁ kṛiki ca° (l. 14) B °jîvyaṁ | râja° B °rthaṁ çravaṇâ° B °riṇâmitaṁ mânayanatîm | . — 14¹. C kṛiki ca kâçirâjâ° BC °kshyako ca gato (C °taḥ) tehi°. — 14². C tahiṁ brâ° kṛikishya râjñâ dû° B °râjñâ duto preshito edṛi°. — 15. BC °dṛiçi mâli°.

16. C °veçayitvâ e° tkâra kṛitaḥ brâ°. — 17. BC °saṁdṛishṭaṁ ta°. — 18. C yas tu°. — 19¹. B °pi deṇi | C °pi deti. — 19². C °mâtrenai° gnâm âga° B °sahasriyo° tâni su ye°.

वाराणसिमागतो यज्ञाति अनेकानि ब्राह्मणानां सहस्राणि समागतानि ॥ सो येन ब्राह्मणास्तेनैव गतो ॥ ब्राह्मणा पि राज्ञो प्रत्युद्गता जयेन वर्धापयित्वा एतां प्रकृतिं मालिनीये तं सर्वं कृत्स्नं राज्ञो निवेदेन्ति ॥ महाराज एषा मालिनी ब्राह्मणानां कण्टको उत्पन्ना न शक्यं ब्राह्मणेहि राज्ञो विषये प्रतीच्छितुं यावन्न
5 मालिनी घातिता ॥ एष समवाये ब्राह्मणपर्षाये निश्चयो उत्पन्नो ॥ राजा पि ब्राह्मण्यो । एषा ब्राह्मणपरियाय क्रिया अनुपरिवर्तितव्या ॥ यदि ते ब्राह्मण्यं अपरित्यक्तं मालिनी परित्यजाहि । अथ ते मालिनी अपरित्यक्ता नास्ति ते ब्राह्मण्यं ॥ ब्राह्मणपरियाया क्रियामनुपरिवर्तन्तस्य तस्य राज्ञो एतदभूषि ॥ इमा ब्राह्मणाक्रान्ता पृथिवी बहुब्राह्मण्या । यदि मालिनीं न परित्यजिष्यामि छिन्नं
10 भविष्यति । नैवं मालिनी भविष्यति नैवमहं ॥

त्यजेदेकं कुलस्यार्थे ग्रामार्थे तु कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजे ॥

तेन दानि काशिराज्ञा मालिनी परित्यक्ता ॥ यथा ब्राह्मणपरियाये अभिमायमाणा भवतु ॥ ते दानि ब्राह्मणा आहंसु ॥ यदि परित्यक्ता मालिनी आज्ञाप-
15 यतु राजा ॥ ततो तेन बाहिरे नगरातो ब्राह्मणानां मूले स्थितकेन दूतो प्रेषितो ॥ आगच्छथ मालिनीमानेथन्ति ॥ राजवचनेन दूतो राजकुलमनुप्राप्तः ॥ आगच्छ मालिनी परित्यक्तासि पितरि ब्राह्मणानां । ब्राह्मणेहि जीवितव्यपरोपयिष्यसि ॥ मालिनीये मातरं आक्रन्ता आरावो मुक्तो सर्वेण च अन्तःपुरेण ॥ नगरे सर्वजनो तेन आरावशब्देन उत्कण्ठितो आकुलीभूतो । महं आसि रोदनं ॥

1. B °gato brā°. — 2. B °rddhāyitvā°. — 3. C °mhāṃ mālī° BC °kaṇṭhaka utpannā° B °hi rājñā nitya° C °ticchayituṃ | ya° B °tuṃ | yā°. — 5[1]. BC esha mamāgrā°. — 5[2]. BC °hmaṇo | mālā°.

6[1]. C mhāṃ brāhma° BC °rāya anupa°. — 6[2]. BC °tyaktaṃ māli°. — 8[1]. BC °shāyāṃ kri° C °vartitavya rājño°. — 8[2]. BC imāṃ brā° °hmaṇyāṃ yadi°. — 9. C °mālinīṃ pari° B °tyajishyanti ḍi° C °tyajishyanti dinnaṃ bha°. — 10. B naiva māli° C °naivaṃ ahaṃ.

11. C tyajed aṅkaṃ kulasyārtha grā°. — 12. B °syārtha ātmārthe prithi° C °ātmānaṃ pri° BC °thīvī tyaje. — 13[1]. B °tyaktā yathā°. — 13[2]. BC °bhipriyan ta°. — 14[1]. C °hamsu | . — 14[2]. BC hai anāpiya/C °nāpiyatu rājñā ta°. — 15. C tataḥ yena° B °to yena bāhira naga° C °ṇānāṃ sthita° B °sthito āga°.

16[1]. BC °echa māli° C °ānenti | B °ānethanti | . — 16[2]. C °canana dūto°. — 16[3]. BC °tuṃ pari° B °ktāsi pitu° C °pitaṃ hi brā°. — 17[1]. B °jīvid vyaparo° C °d vyavaro° BC °ropayasi | . — 17[2]. BC °mātare āga° °rena naga°. — 18. C sarve janaḥ tena ārāvo ca ° ṭhiko āku° B °bhūto mahāṃ°. — 19. BC na(C na)hāṃ ā rodana māli°.

मालिनी वाराणसीतो दूतेन निष्कास्यति पितुः सकाशं ॥ सा दानि दूतेहि
निष्कासिता पितुः प्रतीपिता ॥ एवं महाराज मालिनी ॥ राजा अश्रुकण्ठेन
रुदन्मुखेन महतो जनकायस्य मालिनी ब्राह्मणानां दत्ता परित्यक्ता पितरे ॥ सा
दानि मालिनी यत्र काले पितरि परित्यक्ता ब्राह्मणानामाज्ञाकृता ॥ ततः मा-
लिनी प्रांजलीकृता ब्राह्मणपरिषाये प्रणिपतित्वा ॥ इच्छामि एकां प्रज्ञप्तिं ब्राह्म- 5
णपरिषा यदि प्रमाणान्ति ॥ ते आहन्सु ॥ जल्प या ते विज्ञप्ति ॥ आह ॥ अहं
पितरि ब्राह्मणानां परित्यक्ता युष्माकं अहं वशगता ॥ ब्राह्मणपरिषाये एवमेव
निश्चयो मालिनी मारेतव्या ॥ तदिच्छामि ब्राह्मणपरिषायमेव सकाशातो सप्ताहं
जीवितुं दानं दास्यामि पुण्यं च करिष्यामि ॥ अहं च ब्राह्मणानां कृतोपस्थाना
मयापि ब्राह्मणा उपस्थापिता पितुर्वचनेन ॥ ततो मे सप्ताहस्यात्ययेन मारेथ यं 10
वा वो क्षमति तं करोथ ॥ तेषां ब्राह्मणानां महत्तरकानामुत्पन्नं ॥ एवमेतं यथा
मालिनी जल्पति चिरकालमेताये ब्राह्मणा उपस्थापिता पितुर्वचनेन भोजापिताः ।
यथा एताये पापकं चित्तमुत्पन्नं यं ब्राह्मणां मेलित्वा श्रमणानामभिप्रसन्ना । ततो
नार्हति भूयो श्रमणानां दानं दातुं उत्सृष्टा न तेषां ब्राह्मणानामेव एषा सप्तरात्रं
दानं दास्यति । सद्दीयतु एताय विज्ञप्तिः मुच्यतु सप्तरात्रं सप्ताहस्यात्ययेन हनि- 15
ष्यति ॥ यं कारणं ब्राह्मणपरिषाये एष निश्चय उत्पन्नः तं मालिनीये जीयमानाय
कार्यं ॥ तस्या तेहि ब्राह्मणेहि दत्ता विज्ञप्तिः ॥ सप्तरात्रमुत्सृष्टा महतो जनका-
यस्य ब्राह्मणानां सकाशातो अप्रमादा मंवेया सप्तरात्रं पि न विलुपे त्ति ॥ सा
दानि ओसृष्टा समानापि नूनं सार्धं महता जनकायेन परिवृता पुनः राजकुलं
प्रविष्टा पितरं विज्ञापेति ॥ इच्छामि इमानि सप्त दिवसानि दानं च दातुं पुण्यं 20

1¹. BC °shkâçayati ° sakâçe(C °ço |) sa dâni°. — 1². BC sa dâni° C °shkâçayitvâ pi° B °shkâçitvâ pi ° pitâ ayam°. — 2². BC râjâ açrukanthe rudan(C °ntajamukhena° C °kâya mâli° B °dattâ | pari° C °tyaktvâ pita° B °tare sâ dâni°. — 3. C °pitari tyaktâ° B °âjñâm kri° BC °krito tatah°. — 4. C °krito hrâ° BC °patetvâ icchâ°. — 5. BC °mânanti ‖.

6¹. C °hansuh | . — 6². BC jalpa ya te vijñapti âha°. — 6³. C °ham vasagato B °gatâ hrâ°. — 7. B °cchâ eva° BC °meranti ni° B °çcayo | mâli ° tavyâ tad i°. — 8. BC °sapta jîvi° punya ca ka°. — 9. C °pituh vaca° B °nena tato°. — 10. BC °na mânetha yâ yam° C °yam vo kalu°.

11². C evaitam etam ° hmanâ ye upa° pituh vacanena bhuñjâ° BC °jâyitâh | . — 13¹. BC poçyâyo tâye ° nâm melitvâ° C °çravanâ° B °nânâm abhi°. — 13². B °rhati | bhû° C °yo çravanâ° BC °dânam drishtvâ na teshâm brâhma° C °m evam eshâm sapta° B °syati tad di°. — 15. C ta diyatu ° jñapti mu° B °eyata | sa ° shyati yam°.

16. C °ya esho ni ° tpanno tam°. — 17¹. BC tasya tehi°. — 17². C °tsrishtvâ maha° B °nânâm sakâça° BC °pramâdo bha° B °veyâm sapta° BC °lupenti | . — 18. B sa dâni° BC °hato jana° C °nakâyasya parivritah pu° B °vrito pu° BC °vishte pita° B °ram pijñâpeti | . — 20. B °kartum | yatra° C °tra samanâbhiprâyam | .

च कर्तुं यत्र मम अभिप्रायो ॥ राजा आह ॥ एवमस्तु करोहि पुत्रि पुण्यं यत्र ते
अभिप्रायो ॥ सा आह ॥ भगवन्तं काश्यपं सम्यक्संबुद्धं सश्रावकसंघं सप्ताहमिह
राजकुले परिविषेयं ॥ राजा आह ॥ अनुमोदामि त्वं ॥ भगवां काश्यपो सश्रा-
वकसंघो राजकुले सप्ताहं भक्तेन उपनिमन्त्रितो ॥ अनुकम्पामुपादाय भगवता
5 काश्यपेन वैनेयवशेन महाजनकायं विनयमागमिष्यतीति अधिवासितं ॥ ते ब्रा-
ह्मणा परिकुपिता इच्छन्ति हनितुं जीवन्तीं ॥ मालिनी प्रांजलीकृता ॥ आगमथ
तावत्सप्ताहं यावद्ददामि दानं ॥ ददन्तो ब्राह्मणा कामकारो वः ॥

ताये प्रथमस्मिं दिवसस्मिं शास्ता भोजापितो सह गणेन अन्तःपुरस्य मध्ये मा-
तुश्च पितुश्च मध्यगताये ॥ शास्ता च प्रसादनीयां राज्ञो कथये कथां ॥ विनी-
10 वरणे च धर्मे अभिसमेति राजा अन्तःपुरेण सह ॥ द्वितीयस्मिं दिवसस्मिं विनेसि
पंच पुत्रशता ॥ तृतीयस्मिं दिवसस्मिं यो तेषामनूपि परिवारो च ॥ चतुर्थस्मिं
दिवसे राजामात्यं विनेति संबुद्धः ॥ पंचमे च च बलाग्रं प्रथमफले निवेशये शा-
स्ता ॥ षष्ठस्मिं दिवसस्मिं राजाचार्यं विनेति संबुद्धः ॥ निगमां च सप्तमे स्रोता-
पत्तिफले विनये ॥ राजापि हृष्टचित्तो संबुद्धं पश्यिय सह गणेन भगवन्तं काश्यपं
15 निमन्त्रयेद्यत्नेन ॥ मालिनीये सप्तमे दिवसे भगवन्तं काश्यपं भुक्तावि विदित्वा
अपनीतपात्रं प्रणिधानमुत्पादितं ॥ अनन्तरेणाहं दुःखस्यान्तं करेयं । एदृशो मे
पुत्रो भवेया यथायं भगवन्तो काश्यपो देवमनुष्याणां अर्थचर्यां चरति ॥ एवं मम
पुत्रो अनुत्तरां सम्यक्संबोधिमभिसंबोधित्वा देवमनुष्याणामर्थचर्यां चरतु ॥ मा-

1². C °putriṁ puṇyaṁ°. — 2¹. C °paṁ saṁmya°. — 3¹. C °moditā pi tāye B °modā-
pitā bhagā°. — 3². C °gavā kāçya° B °le saktāhaṁ° C °ptāha bhaktonopani° B °ntrito
som°. — 4. C °nukaṁpā upā° °vato kāçya° °vaineya° B °tāṁ | adhivāsitaṁ te brā°. — 5. B
°pitā iccha° °vantī māli° C °vanti.

6². C °jalikṛtā B °kṛtā kshmatha°. — 6³. BC kshmatho | tāvat sa°. — 7. BC dadato
brā° B °kāle vaḥ tāye° C °kāro ca. — 8. C °thamasmiṁ di° BC °jāyito sa° C °ganā-
ntaḥ° B °gatāye çāstā°. — 9¹. BC çāstāça pra°. — 9². C °varaṇā dharme ca abhisa° B
°dharmā abhisa° °saha dvi°. — 10. BC dvitīyasmiṁ° B °vinesi yaṁ pañca° C °ca putra-
çatāni.

11¹. B triyasmiṁ° C °divasasmiṁ°. — 11². C caturthasmiṁ° BC °mātyaṁ vine° C °vi-
nesi saṁbuddho | . — 12. BC °came ya ca varāgraṁ(C °gra) pratha° B °çāstā shashṭi°. —
13¹. B shashṭismiṁ° C shashṭhismiṁ° BC °divasasmiṁ° C °vinesi sabuddho | . — 13². C
nigamo ca° BC °saptamiye çrotā° B °vineye C °vinayesi. — 14. B rājāpi dṛishṭa° C °buddho
pa° °saha gavantaṁ° BC °nimantreye° C °yo | atra bha°. — 15. C °bhuktavi vidi° B °ṇi-
dhānaṁm utpā°.

16¹. B antarā° karepeyaṁ | . — 16². BC edṛiço me putro° B °bhaveyo ya° C °veyaḥ
yathā° °gavato kā° B °vatā kāçya° BC °caryaṁ carati(C °nti) | . — 17. C °rāṁ saṁmya° BC
°caryā caratā māli°. — 18. B °māro lonā°.

लिनीये भ्राता अजितवलो नाम कुमारो । तेनापि प्रव्रजितं ॥ एवञ्चो मे पिता भवेया यथार्य भगवां काश्यपो एतरहिं । तत्र च अहं दुःखस्थानं करेयं ॥ एवं भगवता काश्यपेन कृकी च काशिराजा सान्तःपुरो पंच कुमारशता अमात्या च भटबलाग्रं योभूयेन च नैगमा सर्वे आर्यधर्मेहि विनीता ॥ तेषामेतदभूषि ॥ अस्माकं मालिनी कल्याणमित्रा मालिनीमागम्य अस्माकं सर्वधर्मेषु धर्मचक्षुर्विशुद्धं ॥ 5 तां ब्राह्मणा जीविताद्व्यपरोपयिष्यन्ति ॥ अपि नाम वयं आत्मानं परित्यजेयाम न मालिनीं ॥ तेहि तेषां ब्राह्मणानां संदिष्टं ॥ एते वयं मालिनीये सह आगच्छाम: मालिनी अस्माकं कल्याणमित्रा न युष्मे शक्या अस्मेहि जीवन्तेहि मालिनी जीविताद्व्यपरोपयितुं ॥ यदा वयं सर्वे न भवाम एवं युष्मे शक्येथ तां मालिनीं जीविताद्व्यपरोपयितुं ॥ ते दानि सपरिवारा: सबलवाहना: मालिनीमग्रतो कृत्वा 10 वाराणसीतो निर्गम्य येन तानि ब्राह्मणसहस्राणि तेन प्रयाता ॥ ते ब्राह्मणानं अनन्तं बलाग्रं दृष्ट्वा मालिनीये सह आगच्छन्तं भीता त्रस्ता ॥ तेहि दूतो प्रेषितो राज्ञो च ॥ निर्गच्छतु मुक्ता भवतु मालिनी तं दिवसं या एषा उद्धृतदण्डा एषा पितरं आलोकं निसृष्टा भवतूद्धृतदण्डा ॥ एषा न अस्माकं मालिनी अपराध्यति । काश्यपो अस्माकं सपरिवारो अपराध्यति तस्य वयं दण्डं करिष्याम: ॥ 15

तेहि दानि सन्नद्धकवचिता: महनयोगा दश पुरुषा ऋषिवदने प्रेषिता: काश्यपं श्रमणं सश्रावकसंघं जीविताद्व्यपरोपयथ ॥ ते भगवता काश्यपेन मैत्र्या स्फारित्वा आर्यधर्मेहि प्रतिष्ठापिता ॥ तेहि ब्राह्मणेहि अपरे विंश पुरुषा: सन्नद्धकवचिता: प्रेषिता: काश्यपं श्रमणं जीविताद्व्यपरोपयथ ॥ ते पुरुषा ऋषिवदनं गता: सन्नद्धा: सम्प्रहरणा: ॥ ते पि भगवता मैत्र्या स्फारित्वा आर्ये धर्मे प्रतिष्ठापिता; ॥ एवं 20

1[2]. B °taṁ edṛi°. — 1[2]. C °gavān kāçya°. — 2[1]. BC °syānaṁ (B °nia) kareyaṁ | . — 2[2]. C °ro paṁ kumā° B °raçata ana° BC °mātyo ca bha° B °lāgro yobhū° C °lāgro ca yona ca nai° °ārye dharme° BC °nīto | . — 4. B tayām etad a° C tasyaitad a° B °shi asmā°.

6[1]. C °hmaṇa jīvi° BC °vyavaropayishyati | . — 6[2]. C °tyaje na māli° B °yāma | na mā° BC °lini tehi. — 7[1]. BC °saṁdrishṭaṁ ete°. — 7[2]. C °mitra na yu° çaktāḥ astehi yushmehi jīva° B °ktā astehi jīva° C °tād vyavaro°. — 9. BC yadi vayaṁ° C °sarveṇa bhavāma evaṁ° B °bhavema e° BC °kaetha | sa māli° C °d vyavaro°. — 10. C °hanāḥ sālinī°.

11. B °ntaṁ | bhītā trastā tehi°. — 12. C °rājñā va B °rājño ca nirga°. — 13. BC °rgamya va mu° C °saṁ ye eshāṁ uddhṛi° eshāṁ pita°. — 14. B esho na yushmākaṁ mā° C eshā na çaktaṁ yushmākaṁ mā°. — 15. C °shyāma | .

16. C °ṛishipattana kāçya° B °dane kāçya° BC °çravaṇaṁ | saçrā° C °d vyavaropa° B °ropatha | . — 17. BC tena bha° ārye dharme° B °tishṭāpi°. — 18. B °apara viṁça° C °apare viṁçat purushāḥ saṁna °citā presi° BC °kāçyapa çrama(C °ṇa)ṇaṁ°. — 19. B °shā rishiva° C °shipattanaṁ ga° °naddhaḥ sapra° ṇās te pi° B °ṇāḥ te pi. — 20[1]. C °ri-tvānāṁ ākarsha° (p. xxiv, l. 3) B °tishṭāpitāḥ | . — 20[2]. B °tishṭāpitāḥ | .

त्रिंशच्चत्वारिंश पंचाशं यत्तका प्रेषिता तत्तका काश्यपेन भगवता मैत्र्याय स्फारित्वा आर्यधर्मेहि प्रतिष्ठापिता: ॥ आकर्षणा एषा बुद्धानां ॥ भगवता वैनेयसत्वानां आवर्जनतायै यत्तका तहिं बुद्धवैनेया आसि तेहि ब्राह्मणसहस्रेहि तत्तका तेहि विसर्जिता: ते च भगवता सर्वे आर्यधर्मेहि विनीता: ॥ मिथ्याप्रतिपन्ना अवशिष्टा अनेकब्राह्मणसहस्रियो ॥ तेषामार्यधर्मेहि विनीतानां भवति ॥ न एते ब्राह्मणा बुद्धमाहात्म्यं जानन्ति । यदि एते भगवन्तं काश्यपमुपसंक्रमेन्सु: महता अर्घेण संयुज्येन्सु ॥ तेहि तेषां ब्राह्मणानां दूतो प्रेषितो ॥ भगवां काश्यपो सम्यक्संबुद्धो महात्मा महाकारुणिको लोकस्यानुग्रहप्रवृत्तो । मा भवन्तो भगवतो काश्यपस्यान्तिके भिक्षुसंघस्य बाधितुं प्रदूषेथ ॥ एवं मानं च मदं च जहित्वा आगच्छथ सर्वे भगवतो काश्यपस्य पादवन्दनं महता अर्घेण संप्रयुज्याथ ॥

सत्य अपिशुनवर्णा न च अपंवती शुची ।
अन्येषां मधुरा श्लक्ष्णा बुद्धस्य भणिता गिरा ॥
तर्पणीया निर्वर्हणी सर्वदाहविनाशनी ।
मैत्रवर्णा सुखवर्णा बुद्धस्य भणिता गिरा ॥
अनग्नदा अविकला अवितथा अनन्यथा ।
यथातथा अविकल्पिता बुद्धस्य भणिता गिरा ॥
प्रेयवाणा अनुत्पन्ना अनोसाना असादिशा ।
नरवशा सुविभक्ता च वाचा अमितबुद्धिनो ॥
सत्यं चापिशुनं च भाषति
स सर्वत: पुन मैत्रचित्तो ।

2[1]. B °ṇā ekā boddhānāṁ bha°. — 2[2]. B °nāṁ akarsha° C °tāyaiḥ yatta ° vainayā āçi tenahi kā °rjitāḥ tehi bhaga °rvehi āryya°. — 4. BC °çishṭhā ana° B °hasrayo te° C °hasrāya. — 5[1]. BC teshāmām ārya°. — 5[2]. C naite brā°.
6. BC °mahaḥ | maha° C °saṁ...yu (saṁyuye??)âuḥ B °jyetsu. — 7[1]. B tenahi te°. — 7[2]. B °vrātto mā bha°. — 8. C mā bhavanto kāçya °ghasya bodhi°. — 9. B °chatha | sarve° BC °ndanāṁ maha °jyatha satyaṁ a°.
11. BC °lyam apiçunaṁ va° B °rṇnaṁ naṁ° C °rṇnaṁ ca° BC °vatiṁ çuciṁ a°. — 12. BC °shāṁ vidhunā vṛa° C °girā. — 13. B tāyaçlyā nirvanasī sa° C tāyalyā nivaṇasī sa° BC °çanīṁ | . — 14. B nailā va° C nilā va° BC °rṇnaṁ mukhāṁ(C °khā) varṇnaṁ bu° BC °khilāṁ girāṁ | . — 15. C anaṅgalā avi° B °vikallā° BC °thā sunananyathā.
16. B °latvām avika° C °buddha sa° BC °khilāṁ girāṁ | . — 17. B °nasāne madishāṁ na° C °novasānena adiçā | . — 18. BC naravāṁçu vi° B °kāṁ ca° BC °vācaṁ a° C °amritabu°. — 19. B °tyam api° C °tyām apiçunaṁ vāra bhāshanti ca sa sarvataḥ | punaḥ mai° B °punar mai ° tto kā°.

उपकारे परमार्थसंहितं
एतं वा परमं सुभाषितं ॥
आविष्टं गदितं स भाषति
उच्चनीचमथापि मध्यमं ।
अनुपदं अन्वचरं विशुद्धं 5
एतं वा परमं सुभाषितं ॥
परमकरुणमुदितयुक्तां
गिरां भाषति दशफलयुक्तां ।
अष्टांगुपेतचतुष्प्रकारां
एतं वा परमं सुभाषितं ॥ 10
वाचां भाषति पंचपुष्पां
सुनिश्चितां वा पुन छिन्नसंशयां ।
न च कर्म किंचि करोति पापं
तथाविधं उत्तमपौरुषत्वं ॥
एवं उपेतं वरलक्षणेहि 15
महाद्युतिगणमनुशासते ।
वरं जातीरतनं प्रहाय
रतिं च स्फीतां अभिनिष्क्रमे ॥
अमृतपदं जिगीषु नन्दजाता
द्रुमसारं वरगन्धमुत्तमं । 20
कोचित्वान कृतविकृतं तं
अथ तेनैव पचेसि ओदनं ॥

1. B kále pa° C pakále pa° B °rthopasaṁhitáṁ | etáṁ vá° C °rthaupasahitá | evaṁ vá° BC °ramáṁ subhásitaṁ ga°. — 3. BC galitam(C °taṁm) ávishṭaṁ(C °shṭa) bhá°. — 5. B °etáṁ vá° C °etáṁ vácá pa° maṁ ca su°.

7. C °ramaṁ muditaṁ yuktáṁ karuṇá gi° BC °ti(C °ti |) daçapha° B °ktáṁ girá bháshati daçaphala muktáya | a° C °ktáṁ girá bháshati muktáya daçaphalaṁ || a°. — 9. B °potáṁ ca° C °tushpra° BC °evaṁ(C °vaṁ) vá paraṁa su° BC °shitánáṁ | subhá°.

11. C subháshitá pa° B subháshati° BC °ñcapaçyá suniçcitánáṁ vá punaḥ chá° BC °yaṁ na°. — 13. C °ca pi ka° BC °rmaṇá kiñcit ka° B °shatvaṁ | C °rushaṁ | . — 15. C °háṁdyutigaṇaṇa° BC °te ca°.

17. BC vará prahíya(C °ua) játiratanaṁ ca° B °me amṛi° C °mámṛi°. — 19. BC °daṁ cikírshaṁ | ye nanda(C °ndam)játaṁ ti drumasára va°.

21. BC dárukhaṇḍa kri° B °vikṛiṇanti | a° C °naṁ kṛiṇanti | a° BC °pacati o°.

एवमिह काश्यपं महर्षिं
परिभाषन्ति जना परीत्तप्रज्ञाः ।
स्वाख्यातपदं अनिन्दितं
पृथुयज्ञानियमनतिक्रमं ॥
5 शमिताविं प्रहाय पुण्यपापं
भवसंयोजनसंक्षये रतं ।
शान्तं सुविभक्तमानसं
तं जनो गरहति अवर्णवर्णं ॥
भिक्षू च उपासका इमे
10 बहु काश्यपशासने रता ।
ज्वलितं व हुताशनं शिखिं
एष वन्दाम समेत्य काश्यपं ॥
एषो द्विपदानमुत्तमो
सो चक्षुर्ददो विनायको ।
15 मानं च मदं च विप्रहा
एष वन्दाम समेत्य काश्यपं ॥

ते ब्राह्मणा सर्वे मिथ्यत्वनियतराशी बुद्धसहस्रमपि यदि धर्मं देशेय अभव्या ते धर्ममाजानितुं बुद्धे च धर्मे च संघे च प्रसादयितुं ॥ ते दानि दण्डलगुडहस्ता येन भगवान्काश्यपो तेन प्रधाविता ॥ भगवता पृथिवीदेवता आभाष्टा ॥ सा दानि
20 तालमात्रेण आत्मभावेन भगवतो पुरतो स्थिता ॥ भगवां तां पृथिवीदेवतामाह ॥ कि च ते तव ब्राह्मणा भवन्ति ॥ सा दानि आह ॥ एते मम पृथिवीनिसृता दासा ॥ भगवानाह ॥ तेन हि यथा दासा पराक्रम्यन्ते तथा पराक्रम ॥ सा दानि महान्तं

1. C evaṁm i ° pa ssa° BC °ṣhi pa° C °ritapra°. — 3. BC °dam ani° BC °ruthâyajña-namanatikramaṁ ga°. — 5. BC gamitâvi pra° C °ṇyâpâ° B °yojanaṁ °taṁ çâ°.

7. BC °vibhaktakta° B °no garha° C °no grahati°. — 9. C bhikshu ca° BC °sakân ime bahavo kâçya° ratâ jvali°.

11. BC jvalitam iva hutâsanaṁ°. — 13. BC °ttamo | esho cakshurdado vi° ko sâ°. — 15. BC °prahâṇya ete(C °evaṁ) vandâ°.

17. B °sarvo mityatvani° C °rva mityatvaṁniya° BC °niyato râçiṁ buddha° C °hasram apyetya dha° B °m apyaseya dharma deçe° tiṁ | buddhe ° ghe ca prâdâda°. — 18. C °dâṇḍeraguḍa° BC °prabodhitâ | . — 19[1]. B °devatâ âbhâṣṭhâ sâ dâ° C °devatâ âbhâsṭhâti. — 19[2]. B °sthito | C °sthitah | .

22[1]. C °râkramanto ta° BC °râkramaḥ sâ dâni°. — 22[2]. C °mahantaṁ ta° B °skandhaṁm samale° C °skandhaṁ utsale°.

तालस्कन्धमुन्मूलेत्वा येन ते ब्राह्मणा तेन प्रधाविता ॥ तं तालस्कन्धं पृथिवीये छटा-
छटाये उपरिपतितं ॥ ते ब्राह्मणा भीता भग्ननष्टाः ॥

इति श्रीमहावस्तुअवदाने मालिनीये वस्तु समाप्तं ॥

एवं मया श्रुतं एकस्मिं समये भगवां कोशलेषु चारिकां चरमाणो महता भिक्षु-
संघेन सार्धं पंचहि भिक्षुशतेहि येन कोशलानां मारकरण्डो निगमो तदवसारि 5
तदनुप्राप्तो तत्रैव विहरति अन्यतरस्मिं वनषण्डे ॥ अथ खलु भगवान् सायाह्नका-
लसमये प्रतिसंलयनाद्व्युत्थाय विहारातो निर्गम्य ऊर्ध्वं च उल्लोकेत्वा दिशाभागां
च अभिविलोकेत्वा अधो च ओलोकेत्वा समं च भूमिभागं समवेक्षित्वा स्मितं प्रा-
दुष्करित्वा दीर्घं चंक्रमं चंक्रमे ॥ अद्राक्षीत् अथ खल्वायुष्मानानन्दो भगवन्तं
सायाह्नकालसमये प्रतिसंलयनाद्व्युत्थाय ऊर्ध्वं च उल्लोकेत्वा दिशाभागां च अभि- 10
विलोकेत्वा अधो च ओलोकेत्वा समं च भूमिभागं समवेक्षित्वा स्मितं प्रादुष्करित्वा
दीर्घं चंक्रमं चंक्रमन्तं । दृष्ट्वा पुनर्येन संबहुला भिक्षवस्तेनोपसंक्रमित्वा भिक्षूनेतद्-
वोचत् ॥ एषो बुद्धो भगवान्सायाह्नसमये प्रतिसंलयनाद्व्युत्थाय ऊर्ध्वं च उल्लोकेत्वा
दिशाभागां च अभिविलोकेत्वा अधो च अवलोकेत्वा समं भूमिभागं समवेक्षित्वा
स्मितं च प्रादुष्करित्वा दीर्घं चंक्रमं चंक्रमति ॥ न च पुनरावुसावो तथागता 15
अर्हन्तः सम्यक्संबुद्धाः अहेतु अप्रत्ययं स्मितं प्रादुष्कुर्वन्ति ॥ किं पुनर्वयं आवुसावो
येन भगवांस्तेनोपसंक्रमित्वा भगवन्तमेतमर्थं पृच्छेम ॥ यथा नं भगवां व्याकरिष्यति
तथा नं धारयिष्याम ॥ साध्वायुष्मन्निति ते भिक्षू आयुष्मतो आनन्दस्य प्रत्यश्रोषि ॥
अथ खलु आयुष्मानानन्दो तेहि भिक्षुहि सार्धं येन भगवांस्तेनोपसंक्रमित्वा
भगवतः पादौ शिरसा वन्दित्वा एकान्ते अस्थासि ॥ एकान्ते स्थितः आयुष्माना- 20

1. B tām tāla° C tām tā ° viye chaṭāye uparipatitām te brā° B °patitāḥ te brā°. — 2. C °nashṭa | . — 5. C °gavān koça° BC °ramṇḍo ma° C °sārdlha pam° B °tad avegāi tad a° C °tad avasāsi tad a° B °prāptā ta° C °traivam vihu° B °rati | anya° vanashaṇḍa ‖ C °vanakhaṇḍe.

6. B °sāyāṅhnakā° C °ūrddha ca viloke° B °ddhvaṃ ca viloketvā° BC °çābhāgam ca° C °bhiviloketvā samaṃ ca ° tvā smitam prā° BC °dirghacaṃkra ° krame adrā°. — 9. B °kshit ‖ atha ° ūrddhaṃ ca ullo° C °ūrddhaṃ ca viloke° BC °çābhāgaṃ ca abhi ° dho ca alloke° B °samavejitvā° C °dirghacaṃkra ° krama | B °taṃ caṃkrame drị°.

12. B °bhikshavas te° C °bhikshavos te° BC °kramyatvā bhikshur etad a°. — 13. C °layanā vyutthāya ūrddhaṃ ca viloketvā abhivilo° B °ūrddhaṃ ca ulloketvā adho ca abhivilo° BC °abhiviloketvā samaṃ° C °smitaṃ prādu°. — 15. BC °thāgato arha° C °ntaḥ saṃmya ° buddhaḥ ahe° BC °tyaye smi°.

16. B °yaṃ anusāvo° C °yaṃ āvusāvo° BC °gavāṃsteno ° cchema yathā°. — 17. B °shyati | tathā°. — 18. C °yushmān iti° B °ti | te bhi° C °bhikshur āyu ° çroshit | . — 19. B °hi yushmā° C °kshubhis sārddhaṃ ° gavāṃnsteno°. — 20. C ekāntasthito āyu°.

नन्दो भगवन्तमेतदवोचत् ॥ इहाहं भगवन्तं पश्यामि सायाह्नसमये प्रतिसंलय-
नाद्व्युत्थाय विहारान्निष्क्रम्य ऊर्ध्वं च उल्लोकेत्वा अधो च अवलोकेत्वा दिशाभागां
च अभिविलोकेत्वा समं च भूमिभागं समवेक्षित्वा स्मितं च प्रादुष्कुर्वन्तं दीर्घं चंक्रमं
चंक्रमन्तं ॥ न च पुनस्तथागता अर्हन्तः सम्यक्संबुद्धा अहेतु अप्रत्ययं स्मितं प्रादु-
5 ष्करोन्ति ॥ को भगवन् हेतुः कः प्रत्ययः स्मितस्य प्रादुष्करणाय ॥ एवमुक्ते भग-
वानायुष्मन्तमानन्दमेतदुवाच ॥ पश्यसि त्वं च आनन्द एतं पृथिवीप्रदेशं ॥ एवं
ह्येतं भगवन् ॥ एतस्मिं आनन्द पृथिवीप्रदेशे भगवतो काश्यपस्य आगमवस्तु अभूषि ॥
पश्यसि त्वमानन्द एतं पृथिवीप्रदेशं ॥ एवं ह्येतं भगवन् ॥ एतस्मिन्नानन्द पृथिवी-
प्रदेशे भगवतो काश्यपस्य कुटीवस्तु अभूषि ॥ पश्यसि त्वमानन्द एतं पृथिवीप्रदेशं ॥
10 एवं ह्येतन्भगवं ॥ एतस्मिन्नानन्द पृथिवीप्रदेशे भगवतो काश्यपस्य चंक्रमयष्टिः
अभूषि ॥ पश्यसि त्वमानन्द एतं पृथिवीप्रदेशं ॥ एवं ह्येतं भगवं ॥ एतस्मिन्नानन्द
पृथिवीप्रदेशे त्रयाणां तथागतानामर्हतां सम्यक्संबुद्धानां निषद्या अभूषि भगवतो
ककुच्छन्दस्य भगवतो च कनकमुनिस्य भगवतो च काश्यपस्य ॥ अथ खल्वायुष्मा-
नानन्दो त्रयार्थाद्भुतसंविग्नरोमहृष्टजातो शीघ्रंशीघ्रं त्वरमाणरूपो येन सो पृथि-
15 वीप्रदेशो तेनोपसंक्रमित्वा तस्मिं पृथिवीप्रदेशे चतुर्गुणसंघाटिं प्रज्ञपेत्वा येन भगवां
तेनांजलिं प्रणामेत्वा भगवन्तमेतदवोचत् ॥ इह भगवां निषीदतु प्रज्ञप्त एव आसने ॥
अयं पृथिवीप्रदेशो चतुर्हि तथागतेहि अर्हन्तेहि सम्यक्संबुद्धेहि परिभुक्तो भविष्यति
भगवता ककुच्छन्देन भगवता च कनकमुनिना भगवता च काश्यपेन भगवता चैतर्हिं ॥
निषीदतु खलु भगवां प्रज्ञप्त एव आसने ॥ आयुष्मां पि आनन्दो भगवतः पादौ

1. B °addeçâmi° BC °ûrddhaṁ ca ullo(C °vilo)ketvâ ° diçà(C °ço)bhâgaṁ ca abhi° C °trâ smiñtadi ca prâ° BC °shkurvanti | dîrghaṁ°. — 4. C °thâgato 'rhantaḥ saṁmya ° buddhe ahetu apra°. — 5². C °yushmân ânanda°.

6². C °vaṁ hi taṁ° BC °gavân eta°. — 7. C aitasmiṁ ° paçya âra(?)manava°. — 8¹. BC °nda evaṁ pṛi°. — 8². C evaṁ hi taṁ bhagavân etasmiṁ° B °gavâṁ eta°. — 8³. C etasmiṁ ânañda° BC °gavatâ kâçya° C °vastum abhûshi. — 9. BC °nda evaṁ pṛi°. — 10¹. C evaṁ hi taṁ bhagavân paçyasi tvam ânanda evaṁ pṛithivîpradeçaṁ | evaṁ hyeta ° gavân eta° B °gavâṁ eta°. — 10². C °smin âna° BC °paçyâ krañkra(C °ka)me aha° B °shashṭhiḥ bhûshi | C °shashṭim abhûshi | .

11¹. BC °nanda pṛithi°. — 11². C evaṁ hi taṁ bhagavân eta° B °gavâṁ eta°. — 11³. C etasmiṁ âna ° tânaṁ 'rhatâ saṁmya° B °rhatâ samya° C °ddhânâṁ vishadyâ(?)vastum abhû° B °shadya | abhûshi | bhaga° C °gavato kanaka° vato kâçya°. — 13. B °to çîghraçîghraṁ° C °tvaramânarû° B °thivîpadeço° C °pradeçe teno° BC °thivîpade catu° C °gavâsteñâ-ñja°.

16. C °eshane. — 17. C °deço caturhi° B °shyati | bha° BC °gavato ca kanaka ° vato ca kâçya° C °gavato caita° B °tarhi nishî°. — 19¹. B °shîdetu kha° C °shidet | kha ° gavân pra° BC °eshane | . — 19². C °yushmân api â ° vato pâ°.

शिरसा वन्दित्वा एकान्ते निषीदि । ते पि भिक्षू भगवतः पादौ शिरसा वन्दित्वा एकान्ते निषीदेन्सुः ॥ एकान्ते निषण्णमायुष्मन्तमानन्दं भगवानेतदवोचत् ॥ इच्छसि पुनस्त्वमानन्द तथागतस्य पूर्वनिवाससंयुक्तां धर्मीकथां भाषतो श्रोतुं इममेव मारकरण्डं निगममारभ्य ॥ एवमुक्ते आयुष्मानानन्दो भगवन्तमेतदवोचत् ॥ एतस्य दानि भगवं कालो एतस्य दानि सुगत समयो यं भगवां भिक्षूणामेतमर्थं भाषे ॥ भिक्षू भगवतो संमुखा श्रुत्वा संमुखा प्रतिगृहीत्वा तथत्वाये धारयिष्यन्ति ॥ एवमुक्ते भगवानायुष्मन्तमानन्दमेतदवोचत् ॥

भूतपूर्वमानन्द भगवति काश्यपे अयं मारकरण्डो निगमो वेभडिङ्गो नाम ब्राह्मणग्रामो अभूषि ॥ वेभडिङ्गे खलु आनन्द ब्राह्मणग्रामे घटिकारो नाम कुम्भकारो अभूषि भगवतो काश्यपस्य उपस्थायको ॥ घटिकारस्य खलु पुनरानन्द कुम्भकारस्य ज्योतिपालो नाम माणवको अभूषि दारकवयस्यको सहपांशुक्रीडनको प्रियो मनापो अपरस्य ब्राह्मणस्य पुत्रो ॥ अथ खल्वानन्द भगवां काश्यपो कोशलेषु चारिकां चरमाणो महता भिक्षुसंघेन सार्धं सप्तहि भिक्षुसहस्रेहि येन कोशलानां वेभडिङ्गो ब्राह्मणग्रामो तदवसारि तदनुप्राप्तः तत्रैव विहरति इमस्मिं एव वनखण्डे ॥ अश्रोषि खल्वानन्द घटिकारो कुम्भकारो भगवां किल काश्यपो कोशलेषु चारिकां चरमाणो येन कोशलानां वेभडिङ्गो ब्राह्मणग्रामं तदवसारि तदनुप्राप्तो तत्रैव विहरति अन्यतरस्मिं वनखण्डे ॥ अथ खल्वानन्द घटिकारो कुम्भकारो येन ज्योतिपालो माणवो तेनुपसंक्रमित्वा ज्योतिपालं माणवमेतदवोचत् ॥ श्रुतमिदं सम्यग्ज्योतिपाल । भगवां किल काश्यपो कोशलेषु चारिकां चरमाणो महता भिक्षुसंघेन सार्धं सप्तहि भिक्षुसहस्रेहि येन कोशलानां वेभडिङ्गो ब्राह्मणग्रामो तदवसारि तद-

1. BC °bhikshu bha° C °vato pâ° BC °detsuḥ | . — 2². B °shaṇṇam â° C °sharṇṇo âyushmân ânandaṃ B °yushmantam âna°. — 3². C icchesi pu° saṃyuktena dharmayâ kathâṃ bhâshato° B °kathâṃ bhashato° BC °çrotuṃ ya ime va(C °vaṃ) mârakaṇḍaṃ niga°. — 4². BC °gavâṃ kâlo° B °maye | yaṃ bha° C °maye | yaṃ bhagavân bhikshû° B °gavaṃ bhi°.

6¹. BC bhikshu bha° B °pragṛgṛhî°. — 6². C °yushmân ânanda°. — 8. BC °vati kâçya° C °çyapa ayam evaṃ karaṇḍakaniga° B °yam eva karaṇḍâ niga° C °gamo veraḍiṅgo nâ° hmaṇo grâ°. — 9. C °raḍiṅgo khalu° B °ḍiṅge khalu ° hmaṇo grâme° nâmo abhû° C °nâmo abhû ° sthâyiko. — 10. B °bhûshi | dâra ° syako hâlapâṃ° C °syako hapâṃ°.

12. BC khalvânânanda° C °gavân kâçya° B °ramâṇo ma ° hmaṇo grâmo° C °harati | anyatarasmiṃ vana° B °evaṃ vanakhaṇḍe aço°. — 15. C atha khalvâ° B °shi | khalvâ ° pu koçikeshu câri ° ramâṇo ya° C °prâptas tatrai ° ude imasmiṃ evaṃ vanakhaṇḍe | .

17. C açroshi khalvâ ° ṭikâlo ku ° ro jyoti° B °kâro | yena° C °tenopa ° mitva jyotipâla mâṇa° B °jyotipâlaṃ° C °tad mâṇa || . — 18. C °daṃ saṃmyak jyotipâlo° B °pâla bha°. — 19. B °nâṃ vebhaḍiṅgaṃ brâ° C °ḍiṅgaṃ brâ ° grâmaṃ tad a° B °khaṇḍe kiṃ°.

सुप्राप्तः तत्रैव विहरति अन्यतरस्मिं वनषण्डे ॥ किं पुनर्वयं सम्यग्ज्योतिपाल येन
भगवां काश्यपो तेनोपसंक्रमेम भगवन्तं काश्यपं दर्शनाये वन्दनाये पर्युपासनाये ॥
एवमुक्ते ज्योतिपालो माणवो घटिकारं कुम्भकारमेतदवोचत् ॥ किं मे भणे घटि-
कार तेहि मुण्डकेहि श्रमणेहि दर्शनाये उपसंक्रामितेहि पर्युपासनाये। द्वितीयं तृतीयं
5 पि आनन्द घटिकारो कुम्भकारो ज्योतिपालं माणवमेतदुवाच ॥ . . . .
किं मे भणे घटिकार तेहि मुण्डेहि श्रमणेहि दर्शनाये उपसंक्रान्तेहि पर्युपासनाये ॥
अथ खल्वानन्द घटिकारस्य कुम्भकारस्य एतदभूषि ॥ को नु खलु स्यादुपायो यं
ज्योतिपालो माणवो भगवन्तं काश्यपं दर्शनाय उपसंक्रमेय पर्युपासनाय ॥ अथ
खल्वानन्द घटिकारस्य कुम्भकारस्य एतदभूषि ॥ अस्ति खलु तस्यैव वनषण्डस्य
10 अविदूरे सुमुका नाम पुष्करिणी यं नूनाहं ज्योतिपालेन माणवेन सार्धं येन सुमुका
नाम पुष्करिणी गच्छेयं शीर्षस्नापनाय ॥ अथ खल्वानन्द घटिकारो कुम्भकारो
येन ज्योतिपालो माणवो तेनुपसंक्रमित्वा ज्योतिपालं माणवमेतदुवाच ॥ किं पुन-
र्वयं सम्यग्ज्योतिपाल येन सुमुका नाम पुष्करिणी तेनोपसंक्रमेम शीर्षस्नापनाय ॥
एवमुक्तो आनन्द ज्योतिपालो माणवो घटिकारं कुम्भकारमेतदुवाच ॥ तेन हि भणे
15 घटिकार सुखी भव यस्येदानि कालं मन्यसे ॥ अथ खल्वानन्द घटिकारो कुम्भ-
कारो शीर्षस्नानीयशाटिमादाय ज्योतिपालेन माणवेन सार्धं येन सा पुष्करिणी
तेनोपसंक्रमेंसु स्नानाय ॥ अथ खल्वानन्द ज्योतिपालो माणवो शीर्षस्नातो उद-
कतीरे अस्थासि केशां सन्धापयमानो ॥ अथ खल्वानन्द घटिकारो कुम्भकारो
ज्योतिपालं माणवमेतदवोचत् ॥ अयं सम्यग्ज्योतिपाल भगवां काश्यपो इमस्मिं
20 येव वनषण्डे किं पुनर्वयं सम्यग्ज्योतिपाल येन भगवां काश्यपो तेनुपसंक्रमेम भगवन्तं
काश्यपं दर्शनाय पर्युपासनाय ॥ एवमुक्ते ज्योतिपालो माणवो घटिकारं कुम्भका-

1. C °puna vayaṃ saṃmya° pāle yena bhagavān kāçya° bha BC °kramena bha° C °nāya vandanāya pa° nāya |. — 3¹. BC °kāraṃ tahi° C °çravanehi°. — 4. C °tṛtīye pi ā° tad avocat |.

6. C °kāra tahi° BC °çravanehi° C °nāye hi upa°. — 7¹. C °kumbha° syāttad abhū°. — 7². BC °syāmupā° C °pāye yaṃ jyo° kāçyapaṃ da°. — 9. C °syaivaṃ vanakhaṇḍa abhidā° B °khaṇḍasya abhidā° C °puskaraṇī yaṃ° sārddha yena° shkaraṇī yaṃ nūnāhaṃ jyotipālena sārddhaṃ yena sumukā nāma puṣkaraṇī deçiraha° B °shkariṇī çiraha°.

11. C °tenopasaṃ°. — 12. C °yaṃ saṃmya° B °puṣkiriṇī teno° BC °kramena çī° C °snānāya koṭim ādāya jyotipālena° (l. 16). — 14¹. B °ukhakāraṃtan ua°. — 14². B °bhave yasye° kāla ma°. — 15. B °nīyakoṭim ādāya jyotipā° puṣkiriṇī tenopasaṃ° metan snā° C °metaṃ snā°.

17. B °çnāsosā° C °asthāsi° BC °çaṃ sandhāpa° C °mānā |. — 18. C °kumbhakāro kumbha°. — 19. C °gavān kāçya° asmin evaṃ vana° B °asmiṃ hyeva vana° jyotila yena° C °gavān kāçyapas tenopa° mema bhaga°.

रमेतदवोचत् ॥ किं मे भणे घटिकार तेहि श्रमणकेहि दर्शनाये उपसंक्रमनेहि
पर्युपासनाये ॥ अथ खल्वानन्द घटिकारो कुम्भकारो ज्योतिपालं माणवं कूका-
टिकायां गृह्य एतदवोचत् ॥ अयं सम्यग्ज्योतिपाल भगवां काश्यपो इमस्मिं एव
वनखण्डे किं पुनर्वयं सम्यग्ज्योतिपाल येन भगवां काश्यपो तेनुपसंक्रमेम भगवन्तं
काश्यपं दर्शनायोपसंक्रमन्तो पर्युपासनाय ॥ अथ खल्वानन्द ज्योतिपालो माणवो 5
घटिकारं कुम्भकारं अपधुनित्वा प्रयाति ॥ तमेनं घटिकारो कुम्भकारो अनुजवित्वा
प्रवेणिकेशेहि गृहीत्वा एतदवोचत् ॥ अयं सम्यग्ज्योतिपाल भगवां काश्यपो इमस्मिं
एव वनखण्डे विहरति किं पुनर्वयं सम्यग्ज्योतिपाल येन भगवां काश्यपस्तेनोपसं-
क्रमेम भगवन्तं काश्यपं दर्शनाय पर्युपासनाय ॥ अथ खल्वायुष्मन्नानन्द ज्योतिपा-
लमाणवस्य एतदभूषि ॥ न खल्वप्राथर्यं वा तं यं मे घटिकारो कुम्भकारो शीर्षस्नातं 10
मूर्ध्नि केशेषु परामृषति मुदन्तकं हीनाय जात्या समानो ॥ तेन हि भणे घटिकार
सुखी भव यस्य दानि कालं मन्यसे ॥

अथ खल्वानन्द घटिकारो कुम्भकारो ज्योतिपालेन माणवेन सार्धं येन भगवां
काश्यपो तेनुपसंक्रमित्वा भगवतः काश्यपस्य पादौ वन्दित्वा एकान्ते अस्थासि ॥
एकान्तस्थितः आनन्द घटिकारो कुम्भकारो भगवन्तं काश्यपमेतदवोचत् ॥ अयं 15
मे भगवन् ज्योतिपालमाणवो दारकवयस्यो सहपांशुक्रीडनको प्रियो मनापो अव-
न्यस्य ब्राह्मणस्य पुत्रो तं भगवां ओवदतु अनुशासतु ॥ अथ खल्वानन्द भगवां
काश्यपो ज्योतिपालं माणवं त्रीहि च शरणगमनेहि पंचहि च शिक्षापदेहि समा-
दापये ॥ अथ खल्वानन्द ज्योतिपालो माणवो भगवन्तं काश्यपमेतदवोचत् ॥ न
तावदहं भगवन्सर्वाणि पंच शिक्षापदानि समादापयिष्ये ॥ अस्ति ताव मे एको 20
पुरुषो विहेठको रोषको जीविताद्व्यपरोपयितव्यो ॥ एवमुक्ते भगवां ज्योतिपालं
माणवमेतदवोचत् ॥ कतमो पुनर्ज्योतिपाल एको पुरुषो विहेठको रोषको जीवि-

1. B kiṁ bho bhaṇe° C kiṁ bo bhaṇe° çramaṇake° B °rçanânâye u°. — 2. C °ṭikâro jyoti° B °mbhakâ jyoti° BC °ṇavaṁ avaṭṭikâyâṁ gṛi°. — 3. C °masmin evaṁ vana° gavâ kâçya° tenopasaṁ° BC °krameyaṁ bhaga° rçanâyopasaṁkramituṁ paryu°.

6. B tam ena gha° C °kâraṁ ku° nujahitvâ° BC °tvâ avanikeçe°. — 7. C °evaṁ vana° B °tenapasaṁkra° BC °kramena bha°. — 9. BC °yushmâu ânanda° C °tasya tad a°. — 10. C °khalve(B °lvi)maṁ yaṁ vâtaṁ° C °çirhasnâ° dhati ruda° BC °kaṁ hitotha jâtyâ° mâno tena°.

11. C °bhava aye dâni° B °kâla ma°. — 13. C °kâçyapena tenopasaṁ° vato kâçya° asthâṁsi ekânte asthâṁsi | B °sthâsi ekâ°. — 15¹. C °sthito âna° BC °vanta kâçya°. — 15². C °pâla mâṇa° B °syo sahashâṁçukri° C °syo sahashâṁpâṁçu° BC °nakâ priyo°.

17. BC °nehi ca pañcahi çikshâ° C °paye | athamâdâpaye | . — 20. B °tâve me eko pu° C °tâvad eko pu° d vyavaropacitavyo | .

21. C evaṁtu u°. — 22. C °puna jyoti° d vyavaropacitavyo | .

नाप्युपरोपयितव्यो ॥ एवमुक्ते आनन्द ज्योतिपालो माणवो भगवन्तं काश्यपमेत-
दवोचत् ॥ अयं भगवं घटिकारो कुम्भकारो यो मे तदा एवं शीर्षस्नातं मूर्ध्नि
केशेहि परामृषति ॥ तदाहं एवमाह ॥ उपसंक्रमेम भगवन्तं काश्यपं दर्शनायो-
पसंक्रमन्तं पर्युपासनाये ॥ .... अपि च भवां सुखी भवतु घटि-
5 कारो कुम्भकारो एषो हं सर्वाणि एवं पंच शिक्षापदानि समादियामि ॥ अथ
खल्वानन्द भगवां काश्यपो घटिकारं कुम्भकारं ज्योतिपालं च माणवं धार्म्यया
कथया संदर्शयित्वा समादापयित्वा समुत्तेजयित्वा संप्रहर्षयित्वा उद्योजयि ॥ अथ
खल्वानन्द घटिकारो ज्योतिपालो च माणवो भगवतो काश्यपस्य पादौ शिरसा
वन्दित्वा प्रक्रामि ॥

10 अथ खल्वानन्द ज्योतिपालमाणवो अचिरप्रक्रान्तो घटिकारं कुम्भकारमेतद-
वोचत् ॥ त्वं पि भणे घटिकार भगवतो काश्यपस्य सम्यग्धर्मं देशितमाजानासि
यथैव अहं ॥ एवमुक्ते आनन्द घटिकारो कुम्भकारो ज्योतिपालं माणवमेतदवोचत् ॥
एवमेतं सम्यग्ज्योतिपाल । अहं पि भगवतो काश्यपस्य एवं सम्यग्धर्मं देशितमा-
जानामि यथैव त्वं ॥ एवमुक्ते आनन्द ज्योतिपालो माणवो घटिकारं कुम्भ-
15 कारमेतदुवाच ॥ कस्मात्पुनः त्वं घटिकार भगवतो काश्यपस्य सन्तिके न अगा-
रस्मादनगारियं प्रव्रजसि ॥ एवमुक्ते आनन्द घटिकारो कुम्भकारो ज्योतिपालं
माणवमेतदवोचत् ॥ अपि मे सम्यग्ज्योतिपाल मातापितरो जीर्णवृद्धौ दुर्बलचक्षू
तेषां नास्त्यन्यो उपस्थायको ॥ तेनाहं भगवतो काश्यपस्य अन्तिके न अगारस्मा-
दनगारियं प्रव्रजामि ॥ अथ खल्वानन्द ज्योतिपालस्य माणवस्य नचिरस्यैव गृहवासे
20 अरतिकल्पयेत् प्रव्रज्याये चित्तं नमे ॥ अथ खल्वानन्द ज्योतिपालो माणवो येन
घटिकारो तेनुपसंक्रमित्वा घटिकारं कुम्भकारमेतदवोचत् ॥ एहि सम्यग्घटिकार

1. B °nando jyoti° gavantā kāçya°. — 3¹. BC °evam āha ‖ bhagava°. — 3². B bhaga-vam kāçya° C bhagavā kāçya° BC °kramitum paryu°. — 4. C °bhagavām su° B °vata | ghaṭi° evaṃ evaṃ çikshā°.

7. C °le ca mäve bha° pādau vanditvā çirasā vanditvā prakrami |. — 10. C °tipāla-māṇa°.

11. BC tvayi bha° C °bhaṇa gha° BC °aya sañmyag dha° C °g dharma deçi° B °nāsi | yathai° C °thaivāham B °aham eva°. — 12. B °nando ghaṭi°. — 13¹. C evaṃtaṃ evaṃ samya°. — 13². C °çyapaçya evaṃ° B °vam samag dha°. — 15. B °mbhakākāraṃtaṃ eta°. — 15. C °t punas tvaṃ gha° ntike agā°.

16. C evaṃtaṃ u°. — 17. C °me sañmya° vṛiddho durbalacakshuḥ teshām° B °kshū | te° C °nāstyanya° sthāpako B °yako tenā°. — 19. C °vasya acirasyaivaṃ gṛi° BC °gṛihe vāse ana(C °ra)tiratir a° C °r utsahyeta pravra° B °tpadyeta pravrajjāryeçcittaṃ° C °jyāyāçcittaṃ°. — 20. C °tenopasaṃ° vocata |.

21. C ehi sañmya° BC °g ghaṭikāra° ntike anuparidehi pravra° C °jyāyaiḥ pra° B °abhy-atri | agā°.

भगवतो काश्यपस्य सन्तिके अनुप्रणिधेमि प्रव्रज्यायै प्रव्रजिष्यामि अगारस्मानगारियं ॥ अथ खल्वानन्द घटिकारो कुम्भकारो ज्योतिपालं माणवमुपादाय येन भगवान्काश्यपो तेनुपसंक्रमित्वा भगवतः काश्यपस्य पादौ शिरसा वन्दित्वा एकान्ते अस्थासि ॥

एकमन्ते स्थितो आनन्द घटिकारो कुम्भकारो भगवन्तं काश्यपमेतदवोचत् ॥ 5 अयं मे भगवं ज्योतिपालो माणवो दारकवयस्यको सहपांशुक्रीडनको प्रियो मनापो अजन्यस्य ब्राह्मणस्य पुत्रो । तं भगवां प्रव्राजेतु उपसंपादेतु च ॥ अथ खल्वानन्द भगवां काश्यपो भिक्षू आमन्त्रेसि ॥ प्रव्राजेथ भिक्षवो ज्योतिपालं माणवं उपसंपादेथ ॥ अथ खल्वानन्द भिक्षवो ज्योतिपालं माणवं प्रव्राजेन्सुः ॥ अथ खल्वानन्द भगवां काश्यपो ज्योतिपालस्मिं भिक्षुस्मिं अचिरोपसंपन्ने कोशलेहि काशीषु चारिकां 10 प्रक्रामि ॥

अथ खल्वानन्द भगवान्काश्यपो काशीषु चारिकां चरमाणो महता भिक्षुसंघेन सार्धं सप्तहि भिक्षुसहस्रेहि येन काशीनां वाराणसी नगरं तदवसारि तदनुप्राप्तः तत्रैव विहरति ऋषिवदने मृगदावे ॥ अश्रोषीत्खल्वानन्द कृकी राजा भगवां किल काश्यपो काशीषु चारिकां चरमाणो महता भिक्षुसंघेन सार्धं सप्तहि भिक्षु- 15 सहस्रेहि येन काशीनां वाराणसी नगरं तदवसारि तदनुप्राप्तः तत्रैव विहरति ऋषिवदने मृगदावे ॥ अथ खल्वानन्द कृकी काशिराजा अन्यतरं पुरुषमामन्त्रेसि ॥ एहि त्वं भो पुरुष येन भगवां काश्यपो तेनोपसंक्रमित्वा मम वचनेन भगवन्तं काश्यपं वन्दनं वदेसि ॥ कृकी काशिराजा भगवतो काश्यपस्य पादौ शिरसा वन्दित्वा अल्पाबाधतां च अल्पातंकतां च बलं सुखतां स्पर्शविहारतां च पृच्छति सुचेतनाम्पि 20 च निवेशनं भक्तेन निमन्त्रेति सार्धं भिक्षुसंघेन सचास्य भगवां काश्यपः अधिवासयति ॥ एवमुक्ते आनन्द भगवां काश्यपो तं पुरुषमेतदुवाच ॥ सुखी भवतु कृकी

4. BC °çyapa te° B °tenusaṁkra° C °tenopasaṁ° vanditvā ekā°. — 5. B °kamanta sthi° B °ṭikālo ku° çyapaṁm eta°.

6. B ayaṁ na bha° C ayaṁ ca bhagavana jyo° BC °putro taṁ°. — 7[1]. C °pravrajetu°. — 7[2]. C °gavān kāçyapo bhikshum āmantrayasi B °tesi pravra°. — 8. BC °pravrajetha°. — 9[1]. BC °pravrajetaṁ ‖. — 9[2]. C °gavān kāçya° BC °tipālasmiṁ° upapanna(C °nno) koçaleshu kāçi(C °çi)shu° C °kāṁ prakrāmi ‖.

12. C °kāçishu° kāçināṁ vā° BC °ṇasīṁ naga° C °ṛishipattane mṛi°. — 14. BC °kṛiki rājā° C °vārāṇasīṁ naga° BC °gaci tad anuakri° C °ṛishipatane mṛi°.

17. B °kāçirājā° C °purushaṁm āma°. — 18. BC °vanta kāçya° C °paṁ vanda kāçyapaṁ vandanaṁ° B °desi kṛiki°. — 19. B °kāçirājā° ca alpākatāṁ ca° C °sukhasparça° ca vihāratāṁ ca pṛi° BC °sucetanā° manivesa sā(C °mā)rddhaṁ° C °kāçyapo adhi°.

22[1]. BC °kāçyapa taṁ° C °etad avocat ‖. — 22[2]. C °kṛiki kāçirā° BC °kumārasya pari°.

काशिराजा सकुमारो सपरिजनो । यस्य दानि कालं मन्यसे ॥ अथ खलु स पुरु-
षो भगवतो अधिवासनां विदित्वा येन वाराणसी नगरं तेन प्रक्रामि ॥ अथ
खल्वानन्द सो पुरुषो येन कृकी काशिराजा तेनुपसंक्रामि ॥ कृकिं काशिराजमि-
दमवोचत् ॥ उक्तं मे महाराज तव वचनेन भगवतो काश्यपस्य वन्दनं । अल्पा-
5 बाधतां च अल्पातंकतां च सुखं च बलं च स्पर्शविहारतां च पृच्छितो सुवेतनानि
च भक्तेन निमन्त्रितो सार्धं भिक्षुसंघेन ॥ अधिवासेति च भगवां काश्यपो यस्येदानि
कालं मन्यसे ॥ अथ खल्वानन्द कृकी काशिराजा इमामेव रात्रिं प्रभूतं प्रणीतं
खादनीयं भोजनीयं प्रतिजागरयित्वा तस्या एव रात्रियं अत्ययेनान्यतरं पुरुषमा-
मन्त्रेसि ॥ एहि त्वं भो पुरुष येन भगवां काश्यपो तेनोपसंक्रमित्वा भगवन्तं काश्य-
10 पमेवं वदेहि ॥ समयो भगवं कृकिस्य काशिराज्ञो निवेशने भक्ताये यस्य भगवं
कालं मन्यसे ॥ साधु महाराज त्ति सो पुरुषो कृकिस्य काशिराज्ञो प्रतिश्रुत्वा वा-
राणसीतो नगरातो निर्गम्य येन ऋषिवदनो मृगदावो तेन प्रक्रामि ॥ अथ
खल्वानन्द स पुरुषो येन भगवां काश्यपो तेनुपसंक्रमित्वा भगवतो काश्यपस्य पादौ
शिरसा वन्दित्वा भगवन्तं काश्यपमेतदुवाच ॥ समयो भगवं कृकिस्य राज्ञो नि-
15 वेशने भक्ताय यस्य दानि भगवं कालं मन्यसे ॥ अथ खल्वानन्द भगवां काश्यपो
तस्य पुरुषस्य प्रतिश्रुत्वा काल्यस्यैव निवासयित्वा पात्रचीवरमादाय भिक्षुसंघपरि-
वृतो भिक्षुसंघपुरस्कृतः येन वाराणसीनगरं तेन प्रक्रमते ॥ तेन खलु पुनरानन्द
समयेन कृकी काशिराजा कुमारामात्यपरिवृतः स्वकस्य निवेशनस्य प्रतिद्वारे
अस्थासि भगवन्तं काश्यपं सश्रावकसंघं प्रतिपालयमानो ॥ अद्राक्षीत्खल्वानन्द
20 कृकी काशिराजा भगवन्तं काश्यपं सश्रावकसंघं दूरतो एव आगच्छन्तं ॥ दृष्ट्वा
पुनर्येन भगवां काश्यपो सश्रावकसंघो तेनोपसंक्रमित्वा भगवतो काश्यपस्य सश्राव-
कसंघस्य पादौ शिरसा वन्दित्वा भगवन्तं काश्यपं सश्रावकसंघं पुरस्कृत्वा स्वकं

1². C yadá dáni°. — 1³. C °ṇasiṁ nagariṁ tena° B °gari tena° C °prakrami. — 2. C °tenupasaṁkrami. — 3. B kṛkiṁ kâçi° C kṛkî kâçi°. — 4¹. C °mahâja tava° BC °vandâmi |. — 4². C °to çucetanâ° B °to suvetanâ° C °viddha lâñ°.

6. C °gavân kâçya°. — 7. B °çirâjâ meva râ° C °çirâjân evaṁ râtriṁ ° jâgaritvâ ta° B °grayitvâ ta° BC °tasyâm eva râ°. — 9. C °vademi B °dehi mama°. — 10. C samaye bhagavân kṛkiçya° B °gavâṁ kṛkiçya ° gavâṁ kâlaṁ° C °gavân kâlaṁ°.

11. BC °râjanti so pu° B °kṛkiçya kâ ° rgamya yena yena çishivadane mṛi° C °çishpatane mṛi° BC °dâve tena° C °prakrami. — 13. C °tenopasaṁ°. — 14. B °gavâṁ kṛkiçya râ° C °gavân kṛkî kâçirâjño° BC °gavâṁ kâlaṁ°. — 15. BC °tvâ kâlasyaiva ni° B °niveçayitvâ pâ° C °yena vârâṇasiṁ nagarî tena° B °rânadye naga°.

17. B °kṛkî kâçi° C °kumâratyapa ° gavanta kâçya°. — 19. C evâgacchaṁ B °ntaṁ dṛṣ°.

निवेशनं प्रवेशेति ॥ तेन खलु पुनः समयेन कृकिस्य काशिराज्ञो निवेशने कोकनदो
नाम प्रासादो नवो अचिरनिष्ठितो अपरिभुक्तपूर्वो केनचिच्छ्रमणकेन वा ब्राह्मणेन
वा ॥ अथ खल्वानन्द कृकी काशिराजा भगवन्तं काश्यपमेतदवोचत् ॥ अयं मे
भगवन्निवेशने कोकनदो नाम प्रासादो नवो अचिरनिष्ठितो अपरिभुक्तपूर्वो केनचि-
च्छ्रमणेन वा ब्राह्मणेन वा तं भगवां प्रथमं परिभुंजतु ॥ भगवता परिभुक्तं पश्चाद्वयं 5
परिभुंजिष्यामः ॥ एवमुक्ते भगवां काश्यपो कृकिं काशिराजं एतदुवाच ॥ तेन हि
महाराज सुखी भव यस्येदानीं कालं मन्यसे ॥ अथ खलु कृकी काशिराजा कोकनदे
प्रासादे आसनानि प्रज्ञापयेत्वा भगवन्तमभिनामयेत् ॥ अथ खलु भगवां कोकनदं
प्रासादं अभिरुहित्वा निषीदि प्रज्ञप्त एव आसने यथासने च भिक्षुसंघः ॥ अथ
खलु आनन्द कृकी काशिराजा भगवन्तं काश्यपं स्वहस्तेनैव खादनीयभोजनीयेन 10
सन्तर्पयित्वा संप्रवारयेत् ॥ एकमेकं च सप्तसप्त पूपका सप्तसप्तेहि निष्ठानेहि पर्णाकु-
लकेन च शालिना ॥

अथ खलु कृकी काशिराजा भगवन्तं काश्यपं भुक्ताविं धौतपाणिं अपनीतपात्रं
विदित्वा अन्यतरं नीचकमासनमादाय येन भगवां काश्यपो तेनुपसंक्रमित्वा भगवतो
काश्यपस्य पादौ शिरसा वन्दित्वा एकान्ते निषीदि ॥ एकान्ते निषण्णो आनन्द 15
कृकी काशिराजा भगवन्तं काश्यपमेतदवोचत् ॥ अधिवासेतु भगवां वाराणसीये
नगरे वर्षावासं ॥ अहं भगवं आरामं कारापयिष्यं इमस्मिं च सप्त कूटागारसह-
स्राणि सप्त च पीठसहस्राणि सप्त च वीथिसहस्राणि सप्त च तुरगसहस्राणि सप्त
च आरामिकसहस्राणि उपस्थापयिष्यामि यानि भिक्षुसंघं प्रत्येकंप्रत्येकं उपस्थिहि-
ष्यन्ति ॥ एवंरूपेण उपस्थानेन भगवन्तं च उपस्थिहिष्यन्ति भिक्षुसंघं च ॥ एवमुक्ते 20

1. C °kṛikiaya ° jño nikeçane kokanadi ná ° nishṭito a° BC °púrvo ná kena° C °i çramaṇena bráhma°. — 3². C °gava niveçanaṁ koka° B °çane koka ° vo acirinishṭo apa° C °acirannishṭo apa ° púrvo kena ° cchramaṇena bráhmaṇena vá | atha khalvánanda kṛikí kâçirâjâ taṁ bhagavân prathamaṁ paribhuktaṁ | paribhuñja° B °jatu bhaga°.

6¹. C °gaván káçyapo kṛikiṁ káçirájam eta°. — 6². B tena hi me mahá° C °yasya dániṁ kálaṁ°. — 7. C °lu káçi kṛikí rájá° B °kí kâçirá° nado prá° C °kanando náma prásádo ka° BC °prajñapayet || khá° C °maye | . — 8. C °gaván kokanandaṁ náma prásá° B °hitvá | nisidaye prajña° C °nishidaye prajñapta avásane°. — 9. C °naivaṁ khá ° janiyena° B °janeyena° BC °saṁpracárayet.

11. B °nishṭánehi parṇṇaku° C °hi pûrṇṇakuṭṭikena ca çá° BC °çálinâṁ || . — 13. C °kávi || dhautapáṇi avanî° B °niṁ avanita° C °çyapa tenopasaṁ ° tvá káçya° B °didi eká°. — 15. BC °shaṇṇo á° C °ánaṁnda kṛi°.

16. C °vásayatu bha° B °vásaṁ ahaṁ°. — 17. B °gavaṁ kárá° C °gavat kárá° BC °imasya ca sa.° saptamaṁ ca sahasráṇi sapta píthasaha° B °ca viçisaha ° ca turamha ° shyanti || yáni° C °yáni ca bhikshusaṁgha pratyekaṁ upa°. — 20¹. C °saṁghasya || . — 20². C °gaván káçya ° kṛikiṁ káçirájam e°.

आनन्द भगवां काश्यपो कृकिं काशिराजानमेतदवोचत् ॥ न हि महाराज शक्यं
वर्षिष्यु मे वर्षावासो भविष्यति ॥ द्वितीयं पि तृतीयं पि एवमेव कर्तव्यं ॥ अथ
खल्वानन्द कृकी काशिराजा नेवं भगवां काश्यपो अधिवासेति वाराणसीयं नगरे
वर्षावासं ति प्रारोदीदश्रुकानि च प्रवर्तयि ॥ अथ खल्वानन्द कृकी काशिराजा
5 भगवन्तं काश्यपमेतदवोचत् ॥ अस्ति पुनर्भगवतो अन्यो पि एवंरूपो उपस्थायको
यथैवाहं ॥ एवमुक्ते आनन्द भगवां काश्यपो कृकिं राजानमेतदवोचत् ॥ अपरि-
पूर्णो खलु मे त्वं महाराज उपस्थायको ॥ एवमुक्ते आनन्द कृकी काशिराजा भग-
वन्तं काश्यपमेतदुवाच ॥ कतमो पुनर्भगवतो मम पूर्णतरो परिपूर्णतरो उपस्था-
यको ॥ एवमुक्ते आनन्द भगवां काश्यपो कृकिं काशिराजानमेतदवोचत् ॥ अस्ति
10 महाराज तुभ्यं एव विजिते वेभडिङ्गं नाम ब्राह्मणग्रामो ॥ तत्र घटिकारो सो मे
उपस्थायको ॥ एवमुक्ते आनन्द कृकी काशिराजा भगवन्तं काश्यपमेतदवोचत् ॥
केवरूपा पुनर्भगवं घटिकारस्य भोगा येहि भगवन्तमुपस्थिहति संघं च ॥ एवमुक्ते
आनन्द भगवां काश्यपो कृकिं काशिराजानमेतदवोचत् ॥ घटिकारो महाराज
कुम्भकारो यावज्जीवं प्राणातिपातातो प्रतिविरतो यावज्जीवमदत्तादानातो प्रति-
15 विरतो यावज्जीवं अब्रह्मचर्यातो प्रतिविरतो यावज्जीवं मृषावादात्प्रतिविरतो
यावज्जीवं सुरामैरेयमद्यप्रमदस्थानातो प्रतिविरतो यावज्जीवं नृत्यगीतवादिता
प्रतिविरतो यावज्जीवं गन्धमाल्यवर्णकधारणात्प्रतिविरतो यावज्जीवं उच्चशयना
महाशयनात्प्रतिविरतो यावज्जीवं विकालभोजनात्प्रतिविरतो यावज्जीवं जातरू-
परजतप्रतिग्रहणात्प्रतिविरतो ॥ न खलु महाराज घटिकारो कुम्भकारो सामं
20 पृथिवीं खनति इति । अथ खलु ये ते भवन्ति मूषोत्किरा वा वारिप्ररोपिता वा

1. B °rája mishyaṁ vajishu° C °rája rishyaṁ varjishu me°. — 2¹. BC °m eva(C °vaṁ) kakartta°. — 2². BC °rájñuam evaṁ bha° çyapa adhivásenti várá° C °çrukáni ca° B °ni ca vartta°. — 4. C °çyapaṁ etad a°. — 5. C aparipûrṇṇo khalu me tvaṁ mahárája upasthâyako | asti pu°.

6¹. C °kṛkiṁ káçirájána°. — 6². C paripú°. — 7. C °kṛkiṁ káçi°. — 8. BC °púrṇṇato paripúrṇataro upa°. — 9¹. C °gavân káçya° kṛki káçi° B °kṛki káçi°. — 9². B °tubhya eva° C °evaṁ viji° B °vebhaḍiṅgaṁ° C °vebhaṁḍidgaṁ ná° B °grámo tatra°. — 10. C °káro kumbhakáro so me°.

11. B °pavaṁtaṁ°. — 12¹. B °gava ghaṭi° C °gavaṁ ghaṭi° upasthitehi saṁ° B °upasthitehi saṁ°. — 12². B evaṁm ukte° C °ánaṁnda° gaván káçyapo kṛkiṁ ká°. — 13. C °mbhakáraṁ yáva° B °práṇátipá° C °práṇátipránátá prativi° B °to jávajjí° C °jjívaṁm adattá° vádán prati° mrdámireya° dyapramádasthá° tyagítaṁ vá° C °çayanát maháçayanát prati° bhojanát prati°.

19. B °kára samaṁ pṛi° C °ro so me pṛi°. — 20. B °ali mûshotkirá vá váriparopá va rucchi° C °múshotkilá váriprarop yá ca rucchi° dáya bhojana°.

यावच्छिन्ना वा मृत्तिका ततो मृत्तिकामादाय भाजनकानि कृत्वा चतुर्महापथे नि-
क्षिपति ॥ ये तेहि भाजनेहि अर्थिका भवन्ति ते तानि भाजनानि मुद्गप्रभिन्नं वा
माषप्रभिन्नं वा तण्डुलप्रभिन्नं वा पूरेत्वा उत्किरित्वा भाजनकान्यादाय अनपेक्षा येव
प्रक्रमन्ति ॥ एवंरूपा महाराज घटिकारस्य कुम्भकारस्य भोगाः येहि तथागतश्च
उपस्थितो संघश्च ॥ मातापितरौ च जीर्णौ वृद्धौ दुर्बलचक्षू ॥ 5

एकमिदमहं महाराज समयं वेभडिङ्गे ब्राह्मणग्रामे विहरामि ॥ सो हं महाराज
काल्यमेव निवासयित्वा पात्रचीवरमादाय वेभडिङ्गं ब्राह्मणग्रामं पिण्डाय प्रक्रामि ॥
सो हं महाराज वेभडिङ्गे ब्राह्मणग्रामे सावदानं पिण्डाय चरन्तो येन घटिकारस्य
कुम्भकारस्य निवेशनं तेनोपसंक्रमित्वा उद्देशे अभ्यासि ॥ तेन खलु पुनः समयेन
घटिकारो कुम्भकारो स्वकान्निवेशनान्निष्क्रान्तो अभूषि ॥ अथ खलु महाराज घटि- 10
कारस्य कुम्भकारस्य मातापितरौ तथागतमेतदवोचत् ॥ निष्क्रान्तो ते भगवं उप-
स्थायको ॥ एषो उपरिकोष्ठके सूपश्च ओदनश्च अतो भगवां परिभुंजतु ॥ सो हं
महाराज उपरिकोष्ठकात्सूपं ओदनं च देवताहि प्रतिग्राहेत्वा परिभुंजित्वा प्रक्रामि ॥
अथ खलु महाराज घटिकारो कुम्भकारो येन स्वकं निवेशनं तेनोपसंक्रमि ॥ अद्रा-
क्षीत्खलु महाराज घटिकारो कुम्भकारो उपरिकोष्ठका सूपं च ओदनं च परिभक्तं 15
दृष्ट्वान पुनर्मातापितरौ एतदवोचत् ॥ केनिमा तात घटिकारस्य उपरिकोष्ठका
सूपो च ओदनं च परिभुक्ता ॥ एवमुक्ते महाराज घटिकारस्य कुम्भकारस्य माता-
पितरौ घटिकारं कुम्भकारमेतदवोचत् ॥ भगवता पुत्र काश्यपेन ॥ अथ खलु
महाराज घटिकारस्य कुम्भकारस्य एतदभवत् ॥ लब्धा पुनर्मे सुलब्धा लाभा यस्य
मे भगवां काश्यपो यावदेको पि अतिविश्वस्तो ॥ तस्य चैवमर्धमासं प्रीतिसुखं कायं 20
न विजहति सप्ताहं च मातापितृणां जीर्णवृद्धानां दुर्बलचक्षूणां ॥

2. BC °hi bhojane° B °rthakā ° nti | te tā ° ni muṅgapra° C °ni mugapra ° vā gāshā-prabhi° B °māshāprabhi° C °bhinnaṃ vā taṇḍulapra° BC °bhinna vā pā ° utkāritvā ° ya ana(C °la)vekshaye ca pra° C °prakrāmanti | . — 4. C °mbhakāra bhogāḥ° B °gāḥ | yehi° C °thāgato upa° BC °sthito mātā°. — 5. C °jirṇṇo vṛ ° cakshuḥ | :

6¹. BC evam i° C °m idaṃ ahaṃ° BC °yaṃ vebhaḍi° C °ḍidgaṃ brā° B °ḍiṅgaṃ brā°. — 6². BC °vebhaḍi° C °ḍidgu brāhma°. — 8. BC °vebhaḍi° C °ḍidge brāhma°. — 9. C °mbhakān niveçanā nishkrā°.

11. C °nto me bhagavān upasthāpako | . — 12¹. C °çca odanaçca odanaçca ato ° gavān pari° BC °bhuñjantu | . — 12². BC °t sūpa odanaṃ° B °tigrahetvā°. — 14². B °ribhuñ-ktaṃ dṛ° BC °shṭvā ca puna° C °piraraṃ e°.

16. BC kenimāṃ tāta° C °odano ca pari° BC °bhukta | . — 17. C °ṭikāra kumbha°. — 18¹. B °putrā kāçya° C °putro kāçya°. — 18². C °ṭikāra kumbha ° rasyaitad a°. — 19. C labdhā puna° B labdho puna° C °gavāṃ yāvat kāçyapo eto pi ati° B °po yāva eko pi ati ° çvasto tasya°. — 20. C °jahanti | saptā ° tāpitaram jirṇṇo vṛ° B °jirṇṇam vṛ° BC °vṛddhāṃ du°

एकमिदं महाराज समयं तथागतस्य वरस्थकुटिकाये छायमानाये तृणानि न
संभुणन्ति ॥ सो हं महाराज भिक्षूणामामन्त्रयेसि ॥ गच्छथ भिक्षवो घटिकारस्य
कुम्भकारस्य निवेशनं तृणानि आनेथ ॥ अथ खलु महाराज ते भिक्षू येन घटि-
कारस्य कुम्भकारस्य निवेशनं तेनोपसंक्रमेन्सु ॥ तेन खलु पुनर्महाराज समयेन
5 घटिकारो कुम्भकारः स्वकातो निवेशनातो निष्क्रान्तो अभूषि ॥ ते तत्र नाद्दशेन्सु
तृणानि अद्दशेन्सु नवच्छदनां आवेशनशालां ॥ अथ खलु महाराज ते भिक्षू येन
तथागतो तेनोपसंक्रमित्वा तथागतस्य पादौ शिरसा वन्दित्वा तथागतं च एतद्-
वोचत् ॥ निष्क्रान्तो ते भगवं उपस्थायको नास्ति चात्र कानिचि तृणानि अस्ति
चात्र नवच्छदना आवेशनशाला ॥ एवमुक्ते महाराज तां भिक्षु एतदवोचत् ॥
10 गच्छथ भिक्षवो घटिकारस्य कुम्भकारस्य नवच्छदनां आवेशनशालां उत्तृणीकृत्वा
तृणानि आनेथ ॥ अथ खलु महाराज ते भिक्षू येन घटिकारस्य कुम्भकारस्य नि-
वेशनं तेनोपसंक्रमित्वा घटिकारस्य कुम्भकारस्य नवच्छदनामावेशनशालामुत्तृणी-
करेन्सु ॥ अथ खलु महाराज घटिकारस्य कुम्भकारस्य मातापितरौ तां भिक्षूने-
तदवोचत् ॥ को एष घटिकारस्य कुम्भकारस्य नवच्छदनामावेशनशालामुत्तृणीकृत्वा
15 तृणानि हरति ॥ एवमुक्ते महाराज ते भिक्षू घटिकारस्य कुम्भकारस्य मातापितरौ
एतदुवाच ॥ अद्य आयुष्मं भिक्षूणां भगवतो काश्यपस्य च वरस्थकुटिकाये छाय-
मानाये तृणा न संभुणन्ति तत्र एतानि तृणानि नीयन्ति ॥ एवमुक्ते महाराज
घटिकारस्य कुम्भकारस्य मातापितरौ तां भिक्षूनेतदवोचत् ॥ हरथ हरथ स्वकानि
व ॥ अथ खलु महाराज घटिकारो कुम्भकारो येन स्वकं निवेशनं तेनोपसंक्रमेसि ॥
20 अद्राक्षीत्खलु महाराज घटिकारो कुम्भकारो नवच्छदनामावेशनशालामुत्तृणीकृतां
तृणानि हृतानि दृष्ट्वा च पुनर्मातापितरौ एतदवोचत् ॥ केनिमा तात घटिकारस्य

1. C °ṇyakuṭṭikâye° BC °mânîye tṛi° C °ni na sambhunanti | . — 2¹. C sâhaṁ ma° bhi-kshuṇâm âmantrayasi° B °kshûṇa âmakaye(?)si gaccha°. — 2². BC gaccha bhikshavo°. — 3. BC °kramensuḥ tena°. — 4. C °mbhakâro sva°. — 5. B °çetau tṛi° C °çetaṁ tṛi° BC °çetau(C °taṁ) navacchandanâ âveçanamâlâ ‖ .

6. B °yena tathâ° C °gataṁ caitad a°. — 8. B °nto te te bhaga° C °gavan upasthâpako nâ° BC °çanamâlâ | . — 10. B °danâṁ aveça° BC °çanamâlâṁ° C °utṛiṇî°.

11. B °bhikshu yena° C °bhikshur yena° mbhakâra niveça° C °cchadanam âveça° BC °çanamâlâ° C °lâṁ uttiṇikaretsuḥ | B °karetsu | . — 13. C °ras tân bhikshun eta°. — 14. C °cchadanam âveçanamâlâm utṛiṇî° B °çanamâlâṁm ultṛi°.

16. BC yato âyu° bhikshûṇâ bhaga° paçya ca a° C °çyakoṭṭikâ° BC °dyamânîye tṛi° B °ta-tretâni°. — 17. C °aya kumbhakâ° bhikshum eta°. — 18. B rahatha rahatharya sva° C rahartha rahartharya svakân svâ | B °kâs eva ‖ . — 19. B °metam | C °metaṁ | . —
20. C °cchadanam âve° BC °çanamâlâ° kṛitâ tṛiṇâ°.

21. BC kenimâṁ tâta° C °cchadanam âve° BC °namâlâm u(B °s u)tṛiṇîkṛitâ tṛi° B °nâni kṛitâni hṛi°.

कुम्भकारस्य नवच्छदना आवेशनशाला उत्तृणीकृता तृणानि हृतानि ॥ एवमुक्ते घटिकारस्य कुम्भकारस्य मातापितरौ घटिकारं कुम्भकारमेतद्वोचत् ॥ भगवतो पुत्र काश्यपस्य अरण्यकुटिकाये तृणानि न प्रभवन्ति तत्र एतानि भिक्षुभिस्तृणानि नीतानि ॥ अथ खलु महाराज घटिकारस्य कुम्भकारस्य एतदभवत् ॥ लब्धा मे सुलब्धा लाभा यस्य पुनरस्य मे भगवां काश्यपो यावदेको पि अतिविश्वस्तो ॥ तस्य चैकमासं प्रीतिसुखं कायं न विजहे अर्धमासं च अन्धानां मातापितॄणां ॥ न खलु पुनरहं महाराज अभिजानामि घटिकारस्य कुम्भकारस्य इदमेवरूपं दौर्मनस्यप्रतिलाभं यथैव महाराज न मे भगवां काश्यपो अधिवासेसि वाराणसीये नगरे वर्षावासन्ति ॥

अथ खल्वानन्द कृकिस्य काशिराज्ञो एतदभवत् ॥ लाभा पुनर्मे सुलब्धा यस्य मे एवंरूपो ब्रह्मचारी विजिते प्रतिवसति द्विपादकानि पुण्यक्षेत्राणि ॥ अथ खल्वानन्द कृकी काशिराजा घटिकारस्य कुम्भकारस्य पण्डुशालिस्य शत वाहां प्रेषयेत् नवोदकं च तैललवणशकटं ॥ अथ खल्वानन्द काश्यपो कृकिं काशिराजानं धर्म्याय कथया संदर्शयित्वा समादापयित्वा समुत्तेजयित्वा संप्रहर्षयित्वा उत्थायासनातो प्रक्रामि ॥

अथ खल्वानन्द भगवां काश्यपो पश्चाद्भक्तं पिण्डपातप्रतिक्रान्तो भिक्षूनामन्त्रेसि ॥ निषीदथ भिक्षवो सन्निपतथ भिक्षवो बन्धथ पर्यङ्कं एको हि पर्यङ्कं बन्धामि तावन्न भिन्दामि यावन्न इमेषां सप्तानां भिक्षुसहस्राणामेतेहि एवं आसनेहि निषण्णानां अनुपादायाश्रवेभ्यश्चित्तानि विमुक्तानि ॥ साधु भगवन्निति ते भिक्षु भगवतो काश्यपस्य प्रतिश्रुत्वा सन्निषीदेन्सुः संनिपतेन्सुः बन्धेन्सुः पर्यङ्कं ॥ अथ खल्वानन्द ज्योतिपालस्य भिक्षुस्य एकरहोगतस्य प्रतिसंलीनस्य अयमेवरूपश्चेतसो परिवितर्को

3. C *ṇyakoṭṭikā* B *tatraitāni* C *ṇāni ānītāni* | . — 4¹. C *kumbha* *sya mātāpitarau etad abhavan* | B *bhavat lābhā*. — 4². BC lābhā me su* ¹ punar yasya* C *gavan kāçya* BC *yāvad etto(C *ko) pi ati* *sto tasya*. — 5. BC tasya cetaḥ(C *to)mānasaṃ pri* kāye na vija* B *pitṛi(?)ṇāṃ* | C *pitṛṇāṃ* | .

6. C *daumanasyaṃ prati* *thaivaṃ mahā* B *adhivāreṣa* C *adhivāsanaṃ vārā* *rṣāvāsanti* | . — 10¹. C *lvānada kṛi* BC *kṛkisya*. — 10². BC lābho puna*.

11. BC *sya çaka vāhāṃ* yet | navo* B *lavanakva*. — 12. C *kṛiki kāçi* *naṃ dharmayā kathāyā saṃ*.

16. C *gavān kāçya* BC *dbhakta piṇḍa* C *mantrayasi* B *tresi nishi*. — 17. B *bhikshavo sa* *ryaṃka eko* C *ryyaṅka eko hi paryaṃka bandhā* BC *tāvad abhinandāmi yā* *ānane ni* C *nishaṇṇānāṃ anukampām upādāya çra* B *kāni sādhu*. — 19. C *gavān iti* | te hi bhi* B *gavānn iti* | te bhi* C *çrapāçya bhagavato kāçyapa* BC *shīdetsuḥ saṃ* B *tetsuḥ parya* C *tetsuḥ bandhatsuḥ parya*. — 20. B *kshusya ekarahogata* *pariteko utpadye aho* C *parike utpa*

उत्पद्ये । अहो पुनरहं भवेयमनागतमध्वानं तथागतो ऽर्हं सम्यक्संबुद्धो विद्याच-
रणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां
च । सो इमं च लोकमभिज्ञाय सदेवकं लोकं समारकं सब्रह्मकं सश्रमणीं प्रजां सदे-
वमनुष्यां इहैव वाराणस्यां ऋषिपतने मृगदावे धर्मचक्रं प्रवर्तेय द्वादशाकारं अप्र-
5 वर्तियं श्रमणेन वा ब्राह्मणेन वा देवेन वा मारेण वा केनचिद्वा पुनर्लोके सह धर्मेण ।
एवं च सर्वाकारसंपन्नं सर्वाकारपरिपूर्णं च धर्मं देशयेयं यथापि भगवां काश्यपो
एतरहिं । एवं च देवमनुष्या श्रोतव्यं श्रद्धातव्यं मन्येन्सु यथा भगवतो काश्यपस्य
एतरहिं । तं भवेयं बहुजनहिताय बहुजनसुखाय लोकानुकम्पाय महतो जनका-
यस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च । हायेन्सु आसुरा काया
10 दिव्या काया अभिवर्धेन्सु । अथ खल्वानन्द भगवां काश्यपो ज्योतिपालस्य भिक्षुस्य
इदमेवरूपं चेतसा एव चेतोपरिवितर्कमाज्ञाय अन्यतरं भिक्षुमामन्त्रयति । एहि त्वं
भिक्षु येन ज्योतिपालो भिक्षुस्तेनोपसंक्रमित्वा ज्योतिपालं भिक्षुमेवं वदेहि । शास्ता
ते आयुष्मं आमन्त्रेति । उपसंक्रमे येन तथागतो । भगवतो काश्यपस्य प्रतिश्रुत्वा
येन ज्योतिपालो भिक्षुस्तेनोपसंक्रमित्वा ज्योतिपालं भिक्षुमेतदवोचत् । शास्ता
15 आयुष्मं ज्योतिपाल आमन्त्रयति उपसंक्रमे येन भगवां । साध्वायुष्मन्निति आयुष्मां
ज्योतिपालस्तस्य भिक्षुस्य प्रतिश्रुत्वा येन भगवान्काश्यपस्तेनोपसंक्रमित्वा भगवतः
काश्यपस्य पादौ शिरसा वन्दित्वा एकान्ते निषीदि । एकान्ते निषण्णं आयुष्मन्तं
ज्योतिपालं भिक्षुं भगवां काश्यप एतदवोचत् । ननु ज्योतिपाल एकस्य ज्योतिपा-
लस्य रहोगतस्य प्रतिसंलीनस्य अयमेवंरूपचेतसो परिवितर्कं उत्पद्ये । अहो
20 पुनरहं भवेयं अनागतमध्वानं तथागतो ऽहं सम्यक्संबुद्धो विद्याचरणसम्पन्नो सुगतो

1. B °gator arhaṃ° C °gataṃ arha sa° damyaçārathiḥ°. — 3. C °abhijñā sade° brahmakaṃ saçravaṇabrāhmaṇaṃ pra° ṛishipatane mṛ° cakra pravartiyaṃ° B °apratīvartiyaṃ çra° C °çravaṇena° B °ṇena brāhma° ṇa vā kecid vā pu° rmeṇa evaṃ°.

6. C °kāraṃ saṃpa° dharma de° BC °deçeyyaṃ° B °rahiṃ evaṃ°. — 7. BC °shyā ca çrota° ṛṣyetau(C °tauḥ) | ya° C °rahi B °rahiṃ taṃ°. — 8. C °bhaveshyaṃ ba° B °veshya ba° C °janakāyārthā° B °nushyāṃ ca hāya°. — 9. B hāyatau | āsu° C hāyetauḥ | āsu° kā-yāḥ abhi° B °ddhetau || C °tauḥ | . — 10. C °çyapa jyotipālasya° BC °taṃ evaṃ ce-topa° tarkān ājñā ca anya° C °taraṃ āmantra°.

11. BC °tipālaṃ bhi° C °kshuṃ etad avocat | B °dehi çāstā°. — 12. C °shmantaṃ āma° BC °ntreti | . — 13¹. BC °kramya yena° B °tathāto bha°. — 13². C °tvā yena tenopasaṃ° (L. 16). — 14. B çāstāṃ te ā° ntrayeti u° kramena bha°. — 15. BC °yena tenopasaṃ° C °nishidi B °shidi ekā°.

17. B °nishaṇṇaṃ āyu° C °shaṇṇa āyu° BC °çyapaṃ eta°. — 18. C nanu te ekasya° BC °pālo rahoga° C °ṃ evarupaṃcceta° B °tarkaṃ utpa° C °rka samutpa°. — 19. C °rar arha bhu° dhaṃ saṃmya° caraṇasaṃpa° B °ṇāṃ ca so imaṃ°.

लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च ॥ सो इमं च लोकमभिज्ञाय परं च लोकमभिज्ञाय सदेवकं च लोकं समारकं सश्रमणब्राह्मणीं प्रजां सदेवमनुष्यां इहैव वाराणसीये ऋषिवदने मृगदावे धर्मचक्रं प्रवर्तेयं त्रिपरिवर्तं द्वादशाकारं अप्रवर्तियं श्रमणेन वा ब्राह्मणेन वा मारेण वा ब्रह्मणा वा केनचिद्वा पुनर्लोके सह धर्मेण ॥ एवं च सर्वाकारसंपन्नं सर्वाकारपरिपूर्णं धर्मं देशयेयं यथापि 5 भगवां काश्यपो एतरहिं ॥ एवं च समग्रं भिक्षुसंघं परिहरेयं यथा भगवां काश्यपो एतर्हिं ॥ एवं च मे देवा च मनुष्या च श्रोतव्यं श्रद्धातव्यं मन्येन्सु यथापि भगवतो काश्यपस्य एतरहि ॥ तं भवेय्या बहुजनहिताय बहुजनसुखाय लोकानुकंपायै महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च ॥ हायेन्सु आसुरा काया दिव्या काया अभिवर्धेन्सु ॥ एवमुक्तो आनन्द ज्योतिपालो भिक्षुर्भगवन्तं काश्यप- 10 मेतदवोचत् ॥ एवमेतं भगवन् ॥ एवमुक्ते आनन्द भगवां ज्योतिपालं भिक्षुमेतद- वोचत् ॥ तस्मादिह ज्योतिपाल इदं सुवर्णपीठकं दुष्ययुगं बुद्धप्रमुखे भिक्षुसंघे देहि कृतपुण्यास्ते देवा च मनुष्याश्च श्रोतव्यं श्रद्धातव्यं मनिष्यन्ति ॥ अदासि खल्वानन्द

1. C °lokem abhijñâya sadevakaṁ samârakaṁ sabrahmakaṁ saçravaṇabrâhma ° devamânushâṁ ihai° B °devamânushyâṁ° C °rânasyâṁ ṛishi° B °sîye rishi° C °shipattane mṛi° varttayeyaṁ drâda° vartiyaṁ çravaṇena vâ° B °hmaṇena mâre° C °hmaṇena vâ devena vâ mâreṇa vâ kena° B °ṇa vâ brahma° mena evaṁ°. — 5. C °kâraṁ saṁpannaṁ savâkâ° pûrṇṇa ca dha° B °deçeyeyaṁ | yathâ ° rahiṁ evaṁ°.

6. C evaṁ ca devâ° (l. 7) B °graṁ ca bhi° reyaṁ | yathâ ° rhiṁ evaṁ°. — 7. C evaṁ ca devâ mama ° nyetsuḥ | ya° B °yetsu | yathâ° C °etarhi B °rahi taṁ bha°. — 8. C °bhaveshyâ ba° B °veyyâ ba° pâyair maha° C °pâya maha° BC °janakasyârthâ ° nâṁ ca hâye°. — 9. B hâyetsu | â° C hâyetsuḥ | â ° vyâ kâyâḥ abhi° B °rddhetsu | C °rddhetsuḥ | atha khalvânanda bhagavât kâçyapo jyotipâlasya bhikshusya idam evarûpaṁ cetaso evaṁ cetoparivitarkâ anyataraṁ bhikshum âmantrayasi | aho punar ahaṁ bhaveyaṁ anâgatam adhvânaṁ tathâgato rhan samyaksaṁbuddho vidyâcaraṇasaṁpanno sugato lokavid anuttara purushadamyasârathî çâstâ devânâṁ ca manushyâṇâṁ ca so imaṁ ca lokam abhijñâya paraṁ ca lokam abhijñâya sadevakaṁ ca lokaṁ samârakaṁ saçravaṇabrâhmaṇaṁ prajâṁ sadevamânushâṇâm ihaivaṁ vârâṇasîye ṛshivadane mṛigadâve dharmacakraṁ pravartteyaṁ triparivarttayaṁ dvâdaçâkâra apravattiyaṁ çravaṇena vâ brâhmaṇena vâ mâreṇa vâ kenacid vâ punar loke saha dharmeṇa evaṁ ca sarvâkâraṁsampannaṁ sarvâkâraparipûrṇaṁ dharma deçayeyaṁ | yathâpi bhagavâṁ kâçyapo etarahiṁ evaṁ ca samagraṁ ca bhikshusaṁghaṁ parihareyaṁ | yathâpi bhagavâṁ kâçyapo etarhiṁ evaṁ ca devaṁmanushyâṇâṁ ca çrotavyaṁ çraddhâtavyaṁ manyetsuḥ | yathâpi bhagavato kâçyapasya etahiṁ taṁ bhaveyâ bahujanahitâya bahujanasukhâya lokânukaṁpâyair mahato janakâyasyârthâya hitâya sukhâya devânâṁ ca manushyâṇâṁ hâyetsuḥ | âsurâ kâyâḥ divyâ kâyâḥ abhivarddhetsuḥ | . — 10. C evaṁm ukte°.

11. C °gavân evam u°. — 12. C °pâlo idaṁ° B °pîtakaṁ du° C °kshusaṁghe ° shyâ ca çro° BC °vyaṁ anyishyanti | . — 13. C adâsit khalvâ ° pîtakaṁ du° B °pîtakaṁ du° C °buddhaṁpra° BC °mukhehi bhi°.

ज्योतिपालो भिक्षुः सुवर्णपीठकं दूष्ययुगं बुद्धप्रमुखे भिक्षुसंघे ॥ अथ खल्वानन्द भगवां काश्यपो स्मितं प्रादुष्करित्वा ज्योतिपालं भिक्षुं व्याकार्षीत् ॥ भविष्यसि त्वं ज्योतिपाल अनागतमध्वानन्तथागतो ऽर्हन्सम्यक्संबुद्धो विद्याचरणसम्पन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च ॥ सो इमं च
5 लोकं अभिज्ञाय परं च लोकमभिज्ञाय सदेवकं च लोकं समारकं सब्रह्मकं सश्रमणब्राह्मणीं प्रजां सदेवमनुष्यां इहैव वाराणसीये ऋषिवदने मृगदावे धर्मचक्रं प्रवर्तयिष्यसि त्रिपरिवर्तं द्वादशाकारं अप्रवर्तितं केनचिच्छ्रमणेन वा ब्राह्मणेन वा देवेन वा मारेण वा केनचिद्वा पुनर्लोके सह धर्मेण ॥ एवं च सर्वाकारसम्पन्नं सर्वाकारपरिपूर्णं धर्मं देशयिष्यसि यथापि भगवां काश्यपो एतरहिं ॥ एवं च समग्रं श्राव-
10 कसंघं परिहरिष्यसि यथापि भगवां काश्यपो एतरहिं ॥ एवं च ते देवा च मनुष्या च श्रोतव्यं श्रद्धातव्यं मंस्येन्सु यथापि भगवतो काश्यपस्य च एतरहिं ॥ तं भविष्यति बहुजनहिताय बहुजनसुखाय लोकानुकम्पायै महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च ॥ हायिष्यन्ति आसुरा काया दिव्या काया अभिवर्धिष्यन्ति ॥

15 अथ खल्वानन्द भगवता काश्यपेन ज्योतिपालस्मिं व्याकृते भूम्या देवा घोषमुदीरयेन्सु ॥ एषो मार्षा भगवता काश्यपेन ज्योतिपालो नाम भिक्षुर्व्याकृतो सो भविष्यति अनागतमध्वानं तथागतो ऽर्हं सम्यक्संबुद्धो विद्याचरणसम्पन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च ॥ सो इमं लोकमभिज्ञाय परं च लोकमभिज्ञाय सदेवकं च लोकं समारकं सब्रह्मकं सश्रमणब्राह्मणीं
20 प्रजां सदेवमनुष्यां अभिज्ञाय इह एव वाराणसीये ऋषिवदने मृगदावे धर्मचक्रं प्रवर्तयिष्यति त्रिपरिवर्तं द्वादशाकारं अपरिवर्तितं श्रमणेन ब्राह्मणेन वा देवेन वा

1. C °gavān kāçya° cchid bhavi°. — 2. C °gato 'haṃ samya° B °ṇāṃ ca sa i° — 3. C °saçravaṇabrāhmaṇī saprajāṃ sadevāṃ samanu° B °devāmanu° C °nuṣyā ihaivaṃ vārāṇasyāṃ ṛṣipattane mṛ° BC °kraṃ pravartiṣye tripari° C °vartta dvāda° C °cchramaṇena vā° B °manena brāhma° C °d vā punar loke° B °rmeṇa evaṃ°.

8. C °ca sarvākārasaṃpa° deçayeyaṃ | ya° B °deçeya | yathā° C °gavān kāçya° B °rahiṃ evaṃ°. — 9. C °graṃ ca saçrā° B °graṃ saçrā° BC °hareya(C. °yaṃ) yathā°. — 10. BC °ca me devā° B °nyāna ya° C °nyetaṃ | yathāpi bhagavān kāçya° B °gavatā kāçyapasya ca etarahi taṃ bha° C °pasya ca etarhi.

11. B °bhaveyā bahu° C °bhaveyā bahujanasukhāya° BC °janasukhāya devānāṃ° C °dhyā ca B °ṇāṃ ca hāyi°. — 13. B °dhyanti | ābhi°. — 15. C °pālasmiṃ ° bhūmyāṃ devā° rayetaṃ B °rayetsu eho°.

16. C °raha bhagavān kāçya° BC °nāmabhi ṣā° B °çātāḥ devā°. — 18. C °devakaṃ lokaṃ ° saçravaṇabrā ° ya ihaiva vā ° ṛṣipattane mṛ° BC °manena vā brāhma ° dharmeṇa evaṃ°.

मारेण वा ब्रह्मणा वा केनचिद्वा पुनर्लोके सह धर्मेण ॥ एवं सर्वाकारसम्पन्नं सर्वाकारपरिपूर्णं धर्मं देशयिष्यति यथापि भगवां काश्यपो एतरहिं ॥ तद्भविष्यति बहुजनहिताय बहुजनसुखाय लोकानुकंपायै महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च ॥ हायिष्यन्ति आसुरा काया दिव्या काया अभिवर्धिष्यन्ति ॥ भूम्यानां देवानां घोषं श्रुत्वा चातुर्महाराजकायिका देवाः त्रायस्त्रिंशा यामाः तुषिता निर्माणरतयः परनिर्मितवशवर्तिन इति ॥ तन्मुहूर्तं यावद्ब्रह्मकायिका देवनिकाया घोषमभ्युद्गच्छेत् ॥ एषो मारिष भगवता काश्यपेन ज्योतिपालो नाम भिक्षु व्याकृतो सो भविष्यति अनागतमध्वानं तथागतोऽर्हं सम्यक्संबुद्धो विद्याचरणसंपन्नो सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च ॥ सो इमं च लोकमभिज्ञाय परं च लोकं अभिज्ञाय सदेवकं च लोकं च सब्रह्मकं सश्रमणब्राह्मणीं प्रजां सदेवमनुष्यामभिज्ञाय इह एव वाराणसीयं ऋषिपतने मृगदावे धर्मचक्रं प्रवर्तयिष्यति त्रिपरिवर्तं द्वादशाकारं अप्रवर्तियं श्रमणेन वा ब्राह्मणेन वा देवेन वा मारेण वा ब्रह्मणा वा केनचिद्वा पुनर्लोके सह धर्मेण ॥ एवं च सर्वाकारसम्पन्नं च सर्वाकारपरिपूर्णं धर्मं देशयिष्यति यथापि भगवां काश्यपो एतरहिं ॥ एवं च देवा च मनुष्या च श्रोतव्यं श्रद्धातव्यं मनिष्यन्ति यथापि भगवतो काश्यपस्य एतरहिं ॥ तद्भविष्यति बहुजनहिताय बहुजनसुखाय लोकानुकंपायै महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च ॥ हायिष्यन्ति आसुरा काया दिव्या काया अभिवर्धिष्यन्ति ॥

अथानन्द भगवां काश्यपस्तस्मिं घोषे व्याहृते तां भिक्षूं धर्म्यया कथया संदर्शये

1. BC °rvākāraṁsampa° shyati | yathā° C °gavān kāçya° B °rahiṁ tad bha°. — 2. B °kaṁpāyair maha° C °pāyaiḥ maha° nakasyārthāya hitāya° B °rthāya sukhā° ṇāṁ ca hāyi°. — 4. C °āsurā kā° bhivaddhayishya° B °varddhayishyanti bhūmyā°. — 5. C bhūmyāṁ ca de°. devās trāya° BC °tavaçavarti°.

6. C °nikāya ghosham abhyudga° B °sham abhyudga°. — 7. BC °gavanta kāçya° C °kshur vyākṛ° gato rha samya° buddhaḥ vi° pannaḥ su° myaçārathiḥ° B °ṇāṁ ca so imaṁ°. — 10. C °vakaṁ lokaṁ ca sabra° çramaṇabrāhmaṇī pra° devāma° BC °shyān abhijñā° C °ihevaṁ vā° shipattane mṛ° rmacakraṁ pra° B °kraṁ parivartta° C °vartta dvādaçākārasampanna apravartiya çramaṇena° BC °ṇa vā brāhmaṇena vā ke° C °puna loke saha dha° B °rmeṇa evaṁ°.

14. BC °kāraṁsampa° B °ripūrṇaṁ dhammaṁ deçayishyati | ya° C °etarhi B °rahiṁ evaṁ°. — 15. C °nyishyati | ya° B °shyanti | ya° BC °gavatā kāçya° C °paçyaitara° B °rahiṁ tad bha°.

16. BC °pāyaiḥ maha° C °nakasyārthā° B °ṇāṁ ca hāyi°. — 19. C °nandā bhagavān kāçyapasya tasmiṁ° B °çyapa tasmiṁ° bhikshur dharmāyā ka° C °bhikshu dharmmayā ka° rçayet samādāpayet samuttejayet saṁpraharshayet | B °rshaye evaṁ°.

समादापये समुत्तेजये संप्रहर्षये ॥ एवं भिक्षवो वितर्केथ एवं मा वितर्केथ एवं मन-
सिकरोथ एवं मा मनसिकरोथ ॥ आत्मद्वीपा भिक्षवो विहरथ अनन्यद्वीपाः आ-
त्मशरणाः अनन्यशरणाः धर्मद्वीपा अनन्यद्वीपाः धर्मशरणा अनन्यशरणाः ॥ अथ
खलु भगवां आदीप्तेन कायेन संप्रज्वलितेन सज्योतिभूतेन एकं तालं वैहायसमभ्युद्गतो
5 भिक्षू धर्मया कथया संदर्शयेत्समादापयेत्समुत्तेजयेत्संप्रहर्षयेत् ॥ एवं भो भिक्षवो
वितर्केथ एवं मा वितर्केथ एवं मनसिकरोथ एवं मा मनसिकरोथ आत्मद्वीपा भि-
क्षवो विहरथ अनन्यद्वीपा आत्मशरणा अनन्यशरणाः धर्मद्वीपा अनन्यद्वीपा धर्म-
शरणा अनन्यशरणाः ॥ अथ खल्वानन्द भगवां काश्यपो एकतालाद्द्वितालं वैहाय-
समभ्युद्गम्य द्वितालात्त्रितालं त्रितालातो चतुतालं चतुतालातो पंचतालं पंचतालातो
10 षट्तालं षट्तालातो सप्ततालं सप्ततालसंस्थितो तां भिक्षू धर्मया कथया संदर्शयति
समादापयति समुत्तेजयति संप्रहर्षयति ॥ एवं भिक्षवः वितर्केथ एवं मा वितर्केथ
एवं मनसिकरोथ एवं मा मनसिकरोथ । आत्मद्वीपा भिक्षवो विहरथ अनन्यद्वीपा
आत्मशरणा अनन्यशरणा धर्मशरणा अनन्यशरणाः ॥ अथ खल्वानन्द भगवां
काश्यपो सप्ततालातो षट्तालसंस्थितो षट्तालात्पंचतालं पंचतालातो चतुतालं
15 चतुतालातो त्रितालं त्रितालातो द्वितालं द्वितालातो एकतालं एकतालातो स्वके
आसने निषण्णो तां भिक्षू धर्मया कथया संदर्शयेत्समादापयेत्समुत्तेजयेत्संप्रहर्षयेत् ॥
एवं भिक्षवो वितर्केथ एवं मा वितर्केथ एवं मनसिकरोथ एवं मा मनसिकरोथ ॥
आत्मद्वीपा भिक्षवो विहरथ अनन्यद्वीपा आत्मशरणा अनन्यशरणा धर्मद्वीपा अन-
न्यद्वीपा धर्मशरणा अनन्यशरणाः ॥ अथ खल्वानन्द भगवां काश्यपः पर्यङ्कं

1. C °tarkayatha evaṁ° B °vaṁ mā tarke° C °tarkayatha evaṁ° BC °rotha evaṁ mānasi°. — 2. C ātmadvi° dvīpāḥ ātma° BC °tmaçaraṇāḥ dharma° C °dvīpāḥ ananya° °rmaçaraṇāçaraṇāḥ ananyaça°. — 3. C °gavān ādi° B °kaṁ tāla, abhyesam abyudga° BC °dgataṁ bhi° B °bhikshuṁ dharmyā katha° C °bhikshu dharmayā° BC °rçayen samā° C °payen samu°. — 5. BC evaṁ vo bhi° C °ketha evaṁ manasikarotha ātmadvi° B °nasikarotha evaṁ mānasikaro° C °dvīpo bhi° B °dvīpā vo bhi° C °tmaçaraṇāḥ dharma° B °raṇā ananyadharma° C °nyadvīpāḥ dharmaçaraṇā dharmaçaraṇā ananyaçaraṇā |.

8. C °nando bhagavān kāçya° tālāṁ dvitālād vaihā° B °tālātuddhi(?)tālāṁ vai° C °dvitālāṁ tritālaṁ tritālā° tutālaṁ ca° B °laṁ pacatālā° tāla | saṁsthi° C °ptatālāto saṁsthito tān bhikshuṁ dharma° B °bhikshuṁ dharma°.

11. C °kshavo vita° BC °rotha evaṁ mānasika°. — 12. BC °haratha | anyadvi° C °tmaçaraṇāḥ ana° ananyaçaraṇā ātmaçaraṇāḥ |. — 13. C °gavāt kāçya° B °to shattālasaṁ° C °to catustālāccatu° BC °catustālāto° B °to tṛtīyaṁ tritālāto° C °tristālāt tristālāto dvitālād dvitālāto ekatālad ekatālāto° sharṇṇāḥ | tāṁ° B °sharṇṇā tāṁ° BC °bhikshuṁ dharma° C °rmayo katha° rçayen samā° B °yet || samā° C °payo samu°.

17. C °kshavaḥ vita° rotha evaṁ mānasi° B °rotha evaṁ mānasika°. — 18. C °raṇāḥ dha° raṇāḥ ana°. — 19. C °bhāmdaṁte tāṁ° BC °bhikshuṁ ānantra°.

भिन्दन्तो तां भिक्षूं आमन्त्रयति ॥ अहं भिक्षवो पर्यन्तं भिक्षामि सर्वेषामिमेषां सप्तानां भिक्षुसहस्राणां एतेहि एव आसनेहि भिषणानामनुपादायाश्रवेभ्यश्चित्तानि विमुक्तानि स्थापयित्वा ज्योतिपालस्य भिक्षुस्य ॥ सो पि मह्यं व्याकृतो च अनुत्तराये सम्यक्संबोधये ॥ स्यात्खलु पुनरानन्द एवमस्यात् अन्यो सो तेन कालेन तेन समयेन ज्योतिपालो नाम भिक्षुः अभूषि ॥ नैतदेवं द्रष्टव्यं ॥ अहं सो तेन कालेन 5 तेन समयेन ज्योतिपालो नाम भिक्षु अभूषि ॥ इदमवोचद्भगवानात्तमना आयुष्मानानन्दो तानि सप्त च भिक्षुसहस्राणि भगवतो भाषितमभिनन्देंसुः ॥

इति श्रीमहावस्तुअवदाने ज्योतिपालसूत्रं समाप्तं ॥

ज्योतिपालेन भिक्षुणा भगवतो काश्यपस्य सश्रावकसंघस्य य्वागूपानं कृत्वा शतसहस्रेण केशरं क्रीणित्वा भगवन्तं काश्यपं सश्रावकसंघं अभ्योकिरेंसि सुवर्णपीठकं 10 च दुष्ययोगं भगवतो काश्यपस्य अदासि । एवं च अनुप्रणिधेसि ॥ यथायं भगवां काश्यपो सम्यक्संबुद्धो द्वात्रिंशतीहि महापुरुषलक्षणेहि समन्वागतो अशीतिहि अनुव्यंजनेहि उपशोभितशरीरो अष्टदशेहि आवेणिकेहि बुद्धधर्मेहि समन्वागतो दशहि तथागतबलेहि बलवां चतुर्हि वैशारद्येहि विशारदो अहो पुन अहं पि अनागतमध्वानं भवेयं तथागतो ऽर्हं सम्यक्संबुद्धो विद्याचरणसंपन्नो सुगतो लोकविदनुत्तरः 15 पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च यथायं भगवां काश्यपो एतरहि ॥ एवं च त्रिपरिवर्तं द्वादशाकारं अनुत्तरं धर्मचक्रं प्रवर्तेयं यथापि भगवान्काश्यपो एतरहिं ॥ एवं च श्रावकसंघं परिहरेयं यथायं भगवां काश्यपो एतरहि ॥ एवं च मे ते देवा च मनुष्या च श्रोतव्यं श्रद्धातव्यं मन्येन्सुः यथापि भगवतो काश्यपस्य एतरहि ॥ एवं तीर्णो तारयेयं मुक्तो मोचयेयं आश्वस्तो आश्वासयेयं परिनिर्वृतो 20

1. C °evam âsane° BC °sane nishanṇṇânâm upâdâ° C °dâya çrava° B °kshusya so pi°. — 3. BC °pi mayaṁ prakṛityaiva(C °kṛityevaṁ) anutta° C °ye saṁmya°. — 4. C syâ khalu° B °m asya syât | anyo° C °syâsyâd anyo° B °kârena tena° C °kshur abhû° B °bhûshi naita°. — 5[1]. C °kshur abhû°.

6. C °gavân âyushmân âttamanâ âna° BC °tâni vayaṁ ca bhikshu° C °bhâshitam abhi° BC °ndensuḥ ‖. — 8. B iti çrîjyoti° C °pâlasya sutraṁ°. — 9. B °ghasya yvâ(?)gupâ° ha-sramena ke° BC °raṁ krînitvâ° abhyakiletsuḥ suva° B °pîtakaṁ ca° C °yugaṁ ca bha°.

11[1]. B °dhesi yathâ°. — 11[2]. C °gavân kâçyapo saṁmya° nvâgagato° BC °âvenikehi° B °dharme sama° C °punar ahaṁ° gato rha samya° B °damyasârathiḥ° C °etarhim evaṁ ca°.

17. C °trishpariva° BC °varteyaṁ | yathâ° gavatâ kâçyapena eta° B °hiṁ evaṁ° C °him evaṁ°. — 18[1]. C °ghaṁ papari° B °reyaṁ | yathâ° C °gavân kâçyapar etarhi B °rahi evaṁ°. — 18[2]. BC °nyetsuḥ yathâ° C °rahim evaṁ°. — 20. B °reyaṁ | yathâ° C °gavân kâçya° etarhi B °rahiṁ taṁ bha°.

परिनिर्वापयेयं यथायं भगवां काश्यपो एतरहिं ॥ तं भवेयं बहुजनहिताय बहु-
जनसुखाय लोकानुकंपाय महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनु-
ष्याणां च ॥ ज्योतिपालः काश्यपेन अनुत्तरायै सम्यक्संबोधये व्याकृतो ॥ भविष्यसि
त्वं ज्योतिपाल अनागतमध्वानं तथागतो ऽर्हं सम्यक्संबुद्धो विद्याचरणसंपन्नः सुगतो
5 लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च इमस्मिं एव
भद्रकल्पे समनन्तरं द्वात्रिंशतीहि महापुरुषलक्षणेहि समन्वागतो अशीतिहि अनुव्यं-
जनेहि उपशोभितशरीरो अष्टादशेहि आवेणिकेहि बुद्धधर्मेहि समन्वागतो दशहि
तथागतबलेहि बलवां चतुर्हि वैशारद्येहि विशारदो ॥ एवं तीर्णो तारयिष्यसि
मुक्तो मोचयिष्यसि आश्वस्तो आश्वासयिष्यसि परिनिर्वृतो परिनिर्वापयिष्यसि यथापि
10 अहं एतरहिं ॥ तं भविष्यसि बहुजनहिताय बहुजनसुखाय महतो जनकायस्यार्थाय
हिताय सुखाय लोकानुकंपायै देवानां च मनुष्याणां च ॥ समनन्तरव्याकृतो पुन-
र्ज्योतिपालो भिक्षुर्भगवता काश्यपेन सम्यक्संबुद्धेन इयं महापृथिवी अतीव षड्विकारं
कम्पे प्रकम्पे संप्रकम्पे भूम्या च देवा घोषमुदीरयेन्सुः शब्दमनुश्रावयेन्सु ॥ यथान्येषु
व्याकरणेषु विस्तरेण कर्तव्यं यथापि अयं भगवतो अनुप्रसाधिः ॥ काश्यपमनुमन्त्र-
15 यित्वा शोधये चारामं पानीयं चोपस्थाये ज्योतिपालो बोधिसत्वो संबुद्धेन अनु-
शिष्टो ॥

ज्यागूपानं अदासि सुवर्णपीठकं च वस्त्रयुगं च ।
बोधिसत्वो ज्योतिपालो प्रार्थयमानो भवनिरोधं ॥
सो तं दानं दत्वा प्रणिधेसि लोकनायको अस्यां ।
20 देवमनुष्याचर्यो आर्यं धर्मं प्रकाशेय्या ॥

1. BC °seya bahu° janakasyârthâ° ṇâṁ ca jyo°. — 3¹. C °pâlo kâ° râyeṁ saṁbodha° B B °krito bhavi°. — 3². C °shyati tvaṁ° B °shyasi | tvaṁ° BC °pâlo anâga° C °gataddhvâ° BC °dhvâne tathâ° C °to rha samya° smiṁ bhadra° B °samayantarâ dvâ° C °ṁtaro dvâ° BC °samatvâga° samanvâ(C °tvâ)gata daça° rado evaṁ°.

8. B °tirṇṇo târa° çvâsayishyasi | pari° shyasi | yathâ° rahiṁ tvaṁ° C °etarhi. — 10. BC tvaṁ bhavi° C °janakasyârthâ° B °ṇâṁ ca sama°.

11. C °ntaraṁ vyâ° punah jyoti° kshuh bhaga° BC °gavato kâçya° C °na saṁmya° sî-vaṁ sha° mpe prakampe saṁpratyaka° ghoshaṁ udî° B °ghoshaṁm udî° BC °yetasu | ça° B °yetas yathâ° C °yetasuh. — 13. BC °eyaṁ | ya° C °pi aryaṁ bha° ṇidheh kâ° B °dhih kâ°. — 15. BC °dhaye vâcâ° C °pathâne jyo°.

17. B yâgupânaṁ bhagavato adâ° C °pâna bhagavato adâ° piṭhakaṁ° B °pîṭakaṁ ca° yugaṁ | bo°. — 18. BC °lo anupeh° B °bhavati bodhiṁ sa taṁ C °bhavati sa taṁ bodhiṁ dâ°. — 19. C dâna datvâ° B °dânaṁ datvâ° BC °yako | asyâ de°. — 20. C devaṁdeva° BC °shyâçcâryo° B °ryo âcâryatha° C °çeyâ | .

एवं च मह्यं अध्यात्मकाशना धर्मस्य एवं च बहू सत्वा आर्यधर्मेहि निवेशेया ॥ एवं च मे शृणेन्तु देवमनुष्या वाक्यं एवं च धर्मचक्रं प्रवर्तेयं बहुजनहिताय धर्मोल्कां प्रज्वालेयं पराहणेयं धर्मभेरीं सपताकां उच्छ्रयेयं धर्मकेतुं धर्मशंखं प्रपूरयेयं कृच्छ्रापन्नैः जातिजरापीडितैर्मरणधर्मैः भवचक्रैः अपायेहि प्रज्ञाचक्षु निवेशेयं ॥ संजीवे कालसूत्रे संघाते रौरवे अवीचिस्मिं षड्डु गतिषु विकीर्णा भवसंसारात्परि- 5 मोचयेयं नरके पक्वविपक्वां अपायनिपीडितां मरणधर्मां षट्सु गतिषु दुःखपञ्जलां भवसंसारात्परिमोचयेयं ॥ अर्थं चरेयं लोकस्य देवमनुष्याणां देशेयं धर्मं ॥ एवं विनेयं सत्वां यथार्थं लोकप्रद्योतो ॥

बुद्धो तुवं होहिसि लोकनायको
अनागते इमस्मिं भद्रकल्पे । 10
कपिलाह्वये अपिवदनस्मिं शाक्यो
तदा तव प्रणिधिविपाको भेष्यति ॥

अथ खलु अच्छिद्रमशबलमकल्माषं परिपूर्णं परिशुद्धं ब्रह्मचर्यं चरित्वा कालगतो तुषिते नाम देवनिकाये श्वेतकेतुर्नाम देवपुत्रो महर्द्धिको महानुभावो सो अन्यां देवां दिव्येहि दशहि स्थानेहि अभिभवति दिव्येनायुषा दिव्येन वर्णेन दिव्येन सुखेन दिव्येन 15 ऐश्वर्येण दिव्येन परिवारेण दिव्येन रूपेण दिव्येहि शब्देहि दिव्येहि गन्धेहि दिव्येहि रसेहि दिव्येहि स्प्रष्टव्येहि ॥ [अन्ये पि देवपुत्रा मं आपृच्छे यं परिपृच्छनीयं इति ॥] अयं श्वेतकेतुर्नाम देवपुत्रो पण्डितो व्यक्तो विशारदो कुशलो मेधावी चत्वारिंशतीहि बुद्धसहस्रेहि अनुप्रव्राजितो । पंचाशीतीनां बुद्धसहस्राणामधिकारकर्माणि कृतानि षष्णवतीहि प्रत्येकबुद्धकोटीहि को पुनर्वादो श्रावकसंघेशाख्येहि ॥ 20

1. B °mahya nayân prakâ° C °hyaṁ namân prakâ° B °rumaya evaṁ ca bahuṁ satvâ° C °bahu satvâ° BC °rmebhi niva° B °veçayyâ | C °çeyâ | . — 2. B °ṇetu de° C °ṇetuh deva° B °rtteyaṁ | ba° dhamolkâ vicareyaṁ parâ° C °rmolkâ vicareyaṁ parâ° BC °râhate dharmabheri sapa° C °patâkaṁ ucchreyeyaṁ dha° B °ucchreyeyaṁ dha° dhamasaṁkhaṁ° C °rmasaṁkhaṁ° BC °kṛicchâpannaiḥ° B °piḍatair ma° C °pîḍanaiḥ mara° kshukair apâye° BC °pâye prajñâ° C °kshur niveçayyâ | B °niveçayyâṁ | . — 5. C °ghâte rau° B °vîcismiṁ shaṭsu ṭhâtiṣikirṇṇa bhava° C °vistirṇṇo bhu° BC °vipakvaṁ apâ° B °pâyavinipiḍitâṁ °C °ḍitaṁ | ma°.
7¹. B athaṁ ca° deçaye dha° C °deçaye dharma | . — 7². C °vinayaṁ sa° B °vineya sa° dyoto bu°. — 9. C °hohiti lo° B °yako | anâgata ima° lpe kapi°.
11. C °shipattanesmiṁ çâ° B °danasmiṁ çâ° BC °tadâ tvaṁ pra° ko meshyati | . — 13. C °çdam acchi° pûrṇṇa pari° BC °shito nâma° kâyo çveta° C °ketu nâma° devâṁ di—hi da° BC °sthâ dârye° C °ryyeṇa aiçvaryeṇa di° B °vyehim prashṭa° BC °shṭavehi | . 17. C anye pi ca deva° BC °putrâṇâṁ âpṛiccha yo pa° nîya iti | . — 18. BC °pravrajito pañcâ°. — 19. C pacaçîtinâṁ° BC °rmâṇi sharṇṇavatehi pra° B °ṭîhi | ko pu° C °hi kaḥ pu° çâkhyâ hi B °çikhyo hi catvâ°.

चत्वारिंशं बुद्धसहस्राणि निर्वृता लोकनायका बुद्धा ।
येषु जिनो अचरि ब्रह्मचर्यं प्रार्थयमानो भवनिरोधं ॥
पंचाशं बुद्धसहस्राणि निर्वृता लोकनायका बुद्धा ।
येहि जिनो अकासि कारं प्रार्थयमानो भवनिरोधं ॥
5 नवनवति प्रत्येकबुद्धकोटीनि निर्वृतानि स्वयंभुनो ।
येषु जिन अकासि कारं प्रार्थयमानो भवनिरोधं ॥
अपरिमिता अर्हन्तकोटी निर्वृता येषु महाध्यायीषु ।
जिनो अकासि कारं प्रार्थयमानो भवनिरोधं ॥

एतेषु पूर्वयोगा प्रकीर्तिता शास्तुनो दशबलस्य ॥
10 अन्या भणिता बहू अभणिता येषु जिनो अकासि कारं प्रार्थयमानो भव-
निरोधं ॥

इति श्रीमहावस्तुअवदाने ज्योतिपालस्य व्याकरणं समाप्तं ॥

राजवंशं आदि ॥ भवति भिक्षवः स कालो भवति स समयो यदयं लोको
दीर्घस्याध्वनो त्ययेन संवर्तति ॥ संवर्तमाने च पुनर्भिक्षवो लोके योभूयेन सत्वा
15 आभास्वरे देवनिकाये उपपद्यन्ति ॥ भवति भिक्षवः स कालो भवति स समयो
यदयं लोको दीर्घस्याध्वनो अत्ययेन विवर्तति ॥ विवर्तमाने खलु पुनर्भिक्षवो
लोके संस्थिते लोकसंनिवेशे अन्यतरा सत्वा आयुःक्षयाय च कर्मक्षयाय च आभा-
स्वरातो देवनिकायातो च्यवित्वा इत्थत्वमागच्छन्ति ॥ ते भवन्ति सत्वा स्वयंप्रभा
अन्तरीक्षचरा मनोमया प्रीतिभक्षा सुखस्थायिनो येनकामंगमाः ॥ धर्मता खलु
20 पुनर्भिक्षवो यं तेषां सत्वानां स्वयंप्रभाणां अन्तरीक्षचराणां मनोमयानां प्रीति-

1. BC °riṃça bu° BC °rvṛtā | loka °yako buddhā yeṣu°. — 2. BC °rodhaṃ pañcā°. — 3. BC °nāyako bu° C °buddho ehi° B °ddhā ye°. — 4. BC °no akāsi | kā°. — 5. BC °navanavatiṃ° C °koṭīni °rvṛtāḥ te sva° B °rvṛtā | te svayaṃbhuno te° C °bhuno te°.
6. C teṣu jinehi akāsi | kā° B teṣu ji° B °kāraṃ pra° °rodhaṃ apari°. — 7. BC °mitā arha °rvṛtā te mahādhyāyiṣu jino°. — 8. B °kāraṃ pra°. — 9. BC °çā ki° BC °daça° B °layalpo (?) bha°. — 10. C alpa bha° B lpo(?) bha° BC °bahu a° C °ahu jino akā° B °kāçi kāraṃ pra° C °si kāraṃ pra°.
12. B °vastuno jyo°. — 13¹. C °vaṃço bhūto B °vaṃça bhūto bha°. — 13². C °kṣavo sa kā° °mayaṃ yad a° BC °lokasya dīrgha° °na saṃvartati saṃvarta°. — 14. BC saṃvartamānā ca pu° C °loke pūñabhūyo°. — 15. C °kṣavo sa kā° °vati samayo° loke dī° °dhvano tyaye° B °rtati vive°.
16. C saṃvartamānā kha° BC °sthite loka° °veço anya° C °trāḥ āyurkṣayāya ca ābhā° B °āyukṣayāya° °echanti te bha°. — 18. BC °rīkṣa(C °kṣe)carā ma(C °mo)yā prītibhakṣāḥ sukhasthā° °gatāḥ dha°. — 19. BC °prabhāṇāṃ anta° B °carāṇāṃ carāṇāṃ mano° C °rīkṣacarāṇāṃ° BC °ṇāṃ yena sukha° C °maṃgamānāṃ |.

चाणां शुभस्थायिनां चिरकालंगतानां ॥ इमे चन्द्रमसूर्या लोके न प्रज्ञायेन्सुः । चन्द्रमसूर्येहि लोके अप्रज्ञायन्तेहि तारकरूपा लोके न प्रज्ञायेन्सुः । तारकरूपेहि लोके अप्रज्ञायन्तेहि नक्षत्रपथा लोके न प्रज्ञायेन्सुः । नक्षत्रपथेहि लोके न प्रज्ञायन्तेहि रात्रिंदिवा लोके न प्रज्ञायेन्सुः । रात्रिंदिवेहि लोके न प्रज्ञायन्तेहि मासार्धमासा लोके न प्रज्ञायेन्सुः । मासार्धमासेषु लोके अप्रज्ञायमानेषु ऋतुसंवत्सरा लोके न प्रज्ञायन्ते ॥ धर्मता खलु भिक्षवो यं तेषां सत्वानां स्वयंप्रभाणामन्तरीक्षचराणां यावच्चिरकालंगतानां ॥ अयमपि महापृथिवी उदकह्रदं विय समुदागच्छेत् ॥ सा वर्णसम्पन्ना रससम्पन्ना सय्यथापि नाम क्षुद्रं मध्वनेडकं एवमास्वादो सय्यथापि नाम क्षीरसन्तानं वा सर्पिसन्तानं वा एवं वर्णप्रतिभासो ॥ अथ खलु भिक्षवो अन्यतरः सत्वः चपलो लोलुपजातीयो तं पृथिवीरसं अंगुलीये आस्वादेसि ॥ तस्य तं स्वादयति वर्णेनापि गन्धेनापि रसेनापि ॥ अन्ये पि सत्वा तस्य सत्वस्य दृष्टानुकृतिमापद्यन्ते ॥ ते पि पृथिवीरसमंगुल्यास्वादयेन्सु ॥ तेषामपि तं स्वादयति यावत् रसेनापि ॥ अथ खलु भिक्षवः सो सत्वो अपरकालेन तं पृथिवीरसं आलोपकारमाहारं आहारेति ॥ अन्ये पि सत्वा तस्य सत्वस्य दृष्टानुकृतिमापद्यन्ते ॥ ते पि तं पृथिवीरसं आलोपकारकमाहारमाहारेन्सुः ॥ यतो च भिक्षवो सत्वा तं पृथिवीरसमालोपकारकमाहारमाहारेन्सुः अथ तेषां काये गुरुत्वं च खरत्वं च कक्खटत्वं च उपनिपते ॥ यापि चाभूत्पूर्वं सत्वानं स्वयंप्रभता अन्तरीक्षचरता मनोमयकायता प्रीतिभक्षता शुभस्थायिता चिरकालंगमता सा अन्तरहाये ॥

1. C °masuryāṇāṃ loke° BC °na prajñāyetsuḥ | . — 2¹. C °ntehi tāyantehi tāra° BC °yetsuḥ tāra°. — 2². BC °trayathā lo° °nte nakṣa°. — 3. C °divaṃ loke° BC °yetsuḥ rātriṃ°. — 4. C °divasehi loke aprajñā° BC °hi māsārdhamāsā māsārdhamāseṣu° C °tu saṃvatsa° prajñānto B °yante dha°.

6. B °kṣavas teṣāṃ° C °vo teṣāṃ° °bhāṇāṃ ava° °kṣagatānāṃ yāva° BC °maṃgamānāṃ kāya°. — 7. B kāyaṃ mapi mahā° C kāyam api° B °samudāgacchet | . — 8. BC °ṇṇapanno rasasampanno sayya° C °thāpi nā kṣudramadhu° B °nāma kṣudramadhva° C °dhvaneḍa(?)kaṃ e° BC °evādaṃ sayya° C °nāma kṣudrasantā° BC °ntānam vā sarpi° bhāso | so pi abhūt va(C °d ra)ṇṇasampanno ca gandhasampanno ca rasasampannā(C °sampanno ca) sayyathāpi nāma kṣudramadhuṃ aneḍa(C °dhu anetra?)kaṃ evam āsvādo | . — 9. C °tara satvā capalolo° °saṃ aṃgulī āsvādesi | . — 10. BC °dayeti | varṇṇe° °senāpi a°.

11. B anya pi sa° BC °tvā taṃ satvasya °dyante te pi°. — 12¹. C °rasaṃ aṃgulyā° yetsuḥ | B °yetsu | . — 12². BC °dayati yā° C °vad rasenāpi | . — 13. C °kṣavo so satvo° kāraṃ āhareti | . — 14¹. B °dyante te pi°. — 14². C °kāratakam ā° °ṃ āhare° BC °retsuḥ ya°. — 15. B yanto ca° C °rasaṃ āropakā° BC °retsuḥ | atha° °rutvaṃ khara° B °ratvaṃ ca kakkaṭatvaṃ° C °ratvaṃ ca kakkatvaṃ ca°.

17. C yo pi cā° B °bhūtapūrvaṃ° BC °rvaṃ so taṃ svayaṃ° C °prabhāṇāṃ antarīkṣacara° yatāṃ prīti° °maṃgatā sā° BC °hāye | dharmatā khu(B °dha)lu punar bhikṣavo yaṃ teṣāṃ

स्वयंप्रभताये अन्तरीक्षचरताये मनोमयताये प्रीतिभक्षताये येनकामंगमताये अन्तर्हिताये चन्द्रमसूर्या लोके प्रज्ञायेन्सु ॥ चन्द्रमसूर्येहि लोके प्रज्ञायन्तेहि तारकरूपा लोके प्रज्ञायेन्सु । तारकरूपेहि लोके प्रज्ञायन्तेहि नक्षत्रपथा लोके प्रज्ञायेन्सु । नक्षत्रपथेहि लोके प्रज्ञायन्तेहि रात्रिंदिवा लोके प्रज्ञायन्ते । रात्रिंदिवसेहि लोके 5 प्रज्ञायन्तेहि मासार्धमासा लोके प्रज्ञायन्ते । मासार्धमासेहि प्रज्ञायन्तेहि ऋतुसंवत्सरा लोके प्रज्ञायेन्सु ॥

अथ खलु भिक्षवस्ते सत्वा तं पृथिवीरसमाहारमाहरन्ता तंवर्णा तंभक्षा तदाहारा चिरं दीर्घमध्वानं तिष्ठेन्सुः ॥ ये तानं बहु आहारमाहारेन्सु ते अभून्सु दुर्वर्णाः ये अल्पमाहारमाहारेन्सुः वर्णवन्ता ॥ ये अभून्सुः वर्णवन्ता ते दुर्वर्णां 10 सत्वा अवजानेन्सुः ॥ वयमस्य वर्णवन्तो सत्वा इमे भवन्ति दुर्वर्णा ॥ तेषां वर्णाभिवर्णप्रत्ययानां मानाभिमानजातीयानां विहरतां पृथिवीरसो अन्तरहाये ॥ भूमिपर्पटको प्रादुर्भवेय सव्यथापि नाम छत्रकं एवं वर्णप्रतिभासो ॥ सो च अभूवर्णसंपन्नो च गन्धसंपन्नो च सव्यथापि नाम क्षुद्रो मधु अनेडको एवमास्वादो ॥ अथ खलु भिक्षवो ते सत्वा तस्मिं पृथिवीरसे अन्तरहिते इमं उदानमुदानयेन्सु ॥ 15 अहो रसो अहो रसेति ॥ सव्यथापि नाम भिक्षव एतरहि मनुष्या सुभोजनखादिता सुहिता भुक्ताविनो इमं उदानमुदानेन्तीति ॥ अहो रसो अहो रसो ति ॥ तमेव पौराणमक्षरमपिव्यं उपनिपते अर्थं चास्य न विभावयेन्सु ॥ अथ खलु भिक्षवो

satrā(C °tva)kāye svayaṃprabhāṇāṃ khalu punar bhikshavaḥ(C °va) satvānāṃ naiva striyāṃ stri(C °tvānā naivaṃ stri)vyaṃjanāni prajñāyante antarikshe°.

1. BC antari° BC °bhakshaye ye ° maṃgatā° B °antahitā° C °ndramasuryā lo° BC °prabhāyetsu(C °tsuḥ) | . — 2. B °yetsu | C °yetsuḥ | . — 3. BC °yantehi nakshatra°. — 4¹. BC °yante rātriṃ°. — 4². C °aloke prajñāyantehi ṛtu° B °yante māsā°. — 5. C ṛitusaṃ° BC °jñāyetsu(C °tsuḥ |) sa te purushavyaṃjanāni | atha khalu satva(C °lu so) satva iti saṃjānayanti | .

7. C °kshavaḥ te sa ° raṃ āharatā taṃ° B °raṃ āhāratā taṃ° BC °shṭhetsuḥ ye sa°. — 8. C ye satsaṃ bahū āhā° BC °retsu te a ° rbalāḥ | ye alpa° C °ra āharetsuḥ balavantā B °retsuḥ ballavantā ye a°. — 9. BC °bhūtsuḥ ballavantā ye durva ° netsuḥ | . — 10¹. BC vayaṃ asmiṃ varṇṇa ° bhavanto durvarṇṇā(B °ṇṇāṃ) teshāṃ°. — 10². B °varṇṇebhi(?) ballapratya° C °rṇṇābhiḥ ballavantāye durvarṇṇāṃ satvā avajānetsuḥ | vayaṃ asmiṃ varṇṇāvaṃto satvā ime bhavanto durvarṇṇāṃ teshāṃ varṇṇābhiḥ ballapratya° BC °virasā anta°.

12¹. C sa bhā° BC °miparpaṭakaṃ prā° C °veya sadyathāpi nāma vāḍakaṃ evaṃ va° B °nāma vāḍakaṃ e°. — 12². C so cābhūd va ° ndhasaṃpannā ca sa ° kshudra madhu°. — 14. B °yetsu | C °yetsuḥ. — 15. C °kshavaḥ etarahiṃ manu° BC °ktāvinā imaṃ° C °naṃ udānantea | B °naṃ udānenti | .

16¹. C °rasati | . — 16². C tam evaṃ pau ° artha cāsya ° yetsuḥ | B °yetsu | . — 17. BC °miparpaṭakaṃ āhāra āhāratāṃ tad va° BC °dbhaktā tadā° C °hārāṃ ciraṃ ° shṭhetsuḥ B °shṭhetsu | .

सत्वास्तं भूमिपर्पटकं आहारं आहरन्ता तद्वर्णा तद्भक्षा तदाहारा चिरं दीर्घमध्वानं
तिष्ठेन्सु ॥ ये तत्र बहुं आहारं आहारेन्सु अभून्सु दुर्वर्णा ये अल्पं आहारं आहा-
रेन्सु ते अभून्सु वर्णवन्तो ॥ ये सुवर्णवन्तो ते दुर्वर्णां सत्वां अवजानेन्सुः ॥ वयमस्य
वर्णवन्ता इमे भवन्ति सत्वा दुर्वर्णा ॥ तेषां वर्णाभिवर्णप्रत्ययानां मानाभिमानजा-
तीयानां विहरतां भूमिपर्पटकमन्तरहाये वनलता प्रादुर्भूता ॥ तद्यथापि नाम 5
कलम्बुका एवं वर्णप्रतिभासापि अभू वर्णसम्पन्नापि गन्धसम्पन्नापि रससंपन्नापि
तद्यथापि नाम क्षुद्रं मधुमनेडकं एवमास्वादा ॥ अथ खलु भिक्षवो ते सत्वा
भूमिपर्पटके अन्तर्हिते अनुस्तनयेन्सु ॥ अहो वदि अहो वदीति ॥ तद्यथापि नाम
भिक्षव एतरहि सत्वा केनचिदेव दुःखधर्मेण स्पृष्टा अनुस्तनयेन्सु अहो वदि अहो
वदीति तमेव पौराणमक्षरमभिन्नं उपनिपते अर्थं च न विभावयेन्सुः । एवमेव 10
भिक्षवस्ते सत्वास्तस्मिं भूमिपर्पटके अन्तर्हिते अनुस्तनयेन्सुः । अहो वदि अहो
वदीति ॥

अथ खलु भिक्षवस्ते सत्वास्तस्मिं भूमिपर्पटके अन्तरहिते वनलतां आहारमाहरन्ता
तंवर्णा तंभक्षा तदाहारा चिरं दीर्घमध्वानं तिष्ठेन्सु ॥ ये तत्र बहुं आहारं आ-
हारेन्सुः ते अभून्सुः दुर्वर्णा ये अल्पाहारं आहारेन्सु अभून्सु वर्णवन्तो ॥ ते तां 15
दुर्वर्णां सत्वा अवजानेन्सु ॥ वयमस्य वर्णवन्तो इमे भवन्ति सत्वा दुर्वर्णा ॥ तेषां
वर्णाभिवर्णप्रत्ययानां मानाभिमानजातीयानां वनलता अन्तरहाये ॥ शालि

